ગુજરાત રાજ્યના શિક્ષણવિભાગના પત્ર-ક્રમાંક
મશબ /1220/583/ છ, તા. 29/08/2020 - થી મંજૂર

# पौरोहित्यम्

## प्रथमा २

## ( ધોરણ 10 )

**प्रतिज्ञापत्रम्**

भारतं मम देशः।
सर्वे भारतीयाः मम भ्रातरः भगिन्यः च सन्ति।
मम मानसे देशस्पृहा अस्ति। समृद्धिसहितं
विविधतापरिपूर्णं तस्य संस्कृतिगौरवम् अनुभवामि।
अहं सदा तत्पात्रं भवितुं यत्नं करिष्यामि।
अहं मम पितरौ आचार्यान् गुरुजनान् च प्रति
आदरभावं धारयिष्यामि।
प्रत्येकेन सह शिष्टव्यवहारं करिष्यामि।
अहं मम देशाय देशबान्धवेभ्यः च मम निष्ठाम् अर्पयामि।
तेषां कल्याणे समृद्धौ च एव मम सुखम् अस्ति।

**मूल्य : ₹ 14.00**

**गुजरातराज्यशालापाठ्यपुस्तकमण्डलम्**
**'विद्यायनम्', सेक्टर 10-ए, गांधीनगरम् - 382010**

© गुजरातराज्यशालापाठ्यपुस्तकमण्डलम्, गान्धीनगरम्
अस्य पाठ्यपुस्तकस्य सर्वेऽधिकाराः गुजरातराज्यपाठ्यपुस्तकमण्डलहस्तकाः सन्ति। अस्य पाठ्यपुस्तकस्य कश्चिदपि भागः केनापि रूपेण गुजरातराज्य-पाठ्यपुस्तकमण्डलनियामकस्य लिखितानुमत्या विना प्रकाशयितुं न शक्यते।

**विषयमार्गदर्शनम्**
श्री हितेन्द्र व्यास

**लेखनम्**
डॉ. चिन्तनकुमार दवे (कन्वीनर)
श्री बालकृष्ण दवे
श्री पार्थ भट्ट
श्री दिपक महेता

**समीक्षणम्**
श्री अनिलकुमार त्रिवेदी
डॉ. अजय भट्ट
श्री अशोक जोषी
श्री भद्रेश व्यास
डॉ. हितेष पाठक

**भाषाशुद्धि**
श्री परमात्मनाथ तिवारी

**संयोजनम्**
डॉ. क्रिष्ना दवे
(विषय-संयोजक : अंग्रेजी)

**निर्माणायोजनम्**
श्री हरेन शाह
(उपनियामक : शैक्षणिक)

**मुद्रणसंयोजनम्**
श्री हरेश एस. लीम्बाचीया
(उपनियामक : उत्पादन)

## प्रस्तावना

प्राच्यगुरुकुलपरम्परानुसारम् अध्ययनं कुर्वतां-छात्राणां कृते प्राचीनार्वाचीनयोः अध्ययनाध्यापनयोः पद्धत्योः समन्वयं कृत्वा गुजरात राज्य-माध्यमिकोच्चतर माध्यमिक शिक्षणसमितिः (बोर्ड) द्वारा नूतना-अभ्यासक्रमसंरचना कृता अस्ति। गुजरातसर्वकारद्वारा प्रमाणिताः मानिताः च अभ्यासक्रमाः सन्ति।

गुजरातसर्वकारद्वारा प्राप्तमान्यतायाः **प्रथमा २ (धो२ण 10) पौरोहित्यम्** इति विषयस्य नूतनाभ्यासक्रमानुसारं सज्जीकृतमिदं पुस्तकं-प्रकाशनात् प्राक् विषयज्ञैः सर्वाङ्गीणतया-समीक्षितं संसूचितपरिवर्तनानुसारं हस्तलिखितेषु लेखेषु योग्यतया संशोधनानन्तरं प्रकाशितमस्ति।

प्रस्तुतं पाठ्यपुस्तकं कक्षानुसारम् उपयोगि परिशुद्धं च कर्तुं मण्डलद्वारा कृते प्रयत्नेऽपि न्यूनतापरिपूर्णार्थं विद्वद्भिः सूचिताः सूचनाः सादरं स्वीकरणीयाः एव।

**पी. भारती** (IAS)
नियामकः — कार्यवाहकप्रमुखः
ता. 26-10-2020 — गान्धीनगरम्

प्रथमावृत्ति : 2020
**प्रकाशक :** गुजरात राज्य शाला पाठ्यपुस्तक मण्डल, 'विद्यायन', सेक्टर 10-ए, गान्धीनगरप्रातिनिध्येन पी. भारती, नियामकः
**मुद्रक** :

# मूलभूतकर्तव्यानि

**प्रत्येकं भारतीयनागरिकस्य कर्तव्यानि निम्नानुसारं स्युः। ***

(क) संविधानं प्रति प्रामाणिकत्वम् आदर्शत्वं संस्थानां राष्ट्रध्वजस्य राष्ट्रीयगीतस्य च आदरः।

(ख) स्वातन्त्र्याय अस्मदीयराष्ट्रियसत्याग्रहं प्रेरयताम् आदर्शानां हृदये प्रतिष्ठापनम् अनुसरणं च।

(ग) भारतस्य सार्वभौमत्वस्य एकतायाः अखण्डिततायाश्च समर्थनं च।

(घ) देशस्य रक्षणं राष्ट्रियसेवायै उद्घोषाणायां जातायां तदनुसरणञ्च।

(च) धार्मिक-भाषाकीय-प्रादेशिकेभ्यः धार्मिकेभ्यो वा भेदेभ्यः परं स्थित्वा, समस्तभारतीयेषु साम्मनस्यसमानबन्धत्वभावनायाः वृद्धिः, स्त्रीणां गौरवहानिकारकव्यवहारत्यागश्च।

(छ) अस्माकं समन्वितसंस्कृतेः समृद्धदायस्य मूल्यं ज्ञात्वा तदवग्रहः।

(ज) वनानां तडागानां नदीनाम् अन्यवन्यपशुपक्षिसहितं प्राकृतिकपर्यावरणरक्षणं तद्वर्धनं तथैव जीवमात्रं प्रति अनुकम्पाभावः।

(झ) वैज्ञानिकमानसाय मानवतावादाय जिज्ञासायै भावनाभिबोधः।

(ट) सामान्यसम्पत्तिरक्षणं हिंसायाः त्यागश्च।

(ठ) राष्ट्रं पुरुषार्थस्य सिद्धेश्च अधिकाधिकमुन्नतसोपानानि प्रति सततं प्रगतिशीलं स्यात्तदर्थं वैयक्तिकसामूहिकप्रवृत्तीनां समस्तक्षेत्रेषु श्रेष्ठत्वम् आसादयितुं प्रयत्नः।

(ड) मात्रा पित्रा अथवा अभिभावकेन षड्वर्षतः चतुर्दशवर्षं यावत् (६. तः १४) वयसे बालकाय अथवा पाल्याय शिक्षणलाभाः देयाः।

---


* भारतीय संविधानम् : अधिनियमः 51-क

# अनुक्रमणिका


| | | |
|---|---|---|
| १. | पुण्याहवाचनम्-१ | 1 |
| २. | पुण्याहवाचनम्-२ | 6 |
| ३. | पुण्याहवाचनम्-३ | 12 |
| ४. | पुण्याहवाचनम्-४ | 19 |
| ५. | मातृकापूजनम्-१ | 23 |
| ६. | मातृकापूजनम्-२ | 27 |
| ७. | वसोर्द्धारापूजनम् | 31 |
| ८. | वैश्वदेवसंकल्पः आयुष्यमन्त्रजपश्च | 34 |
| ९. | नान्दीश्राद्धम् | 39 |
| १०. | ब्राह्मणवरणम् | 44 |
| ११. | कुण्डपूजनम् | 51 |
| १२. | पञ्चभूसंस्कारः | 62 |
| १३. | नामकरणसंस्कारः | 67 |
| १४. | कर्णवेधसंस्कारः | 79 |
| १५. | गृहनिष्क्रमणसंस्कारः | 75 |
| १६. | अन्नप्राशनसंस्कारः | 78 |
| १७. | षट्पिण्डीकरणम् | 82 |
| १८. | शौचाशौचनिर्णयः | 86 |
| १९. | कुम्भविवाहप्रयोगः | 90 |
| २०. | पवमानसूक्तम् | 98 |

# ११ कुण्डपूजनम्

**प्रस्तावना**



अस्माकं भारतीयसंस्कृतौ वैदिककालादेव यज्ञ-यागादि कर्म प्रचलति। वेदेषु यज्ञस्य वर्णनं प्रदर्शितम् अस्ति। स्मृतिग्रन्थेषु पुराणेषु च यज्ञस्य प्रमाणं तथा केन यज्ञाः कृताः तत् सर्वं प्राप्यते। यज्ञादि-कर्मणि कुण्डस्य अतीव महत्वम् अस्ति।

यज्ञकार्यार्थं एकम्, पञ्च, एवं नव कुण्डानां निर्माणं भवति। कुण्डः शरीरस्य स्वरूपम् अस्ति अस्मिन् कुण्डे स्थापितोग्निः तेजोमयः परमात्मा तथा शरीरेस्थितः जठराग्निस्वरूपः अस्ति। कुण्डे गर्तः, नाभिः, कण्ठः, योनिः, मेखला इति पञ्चाङ्गानि सन्ति। योन्याः उपरि मृत्तिकया निर्मित्तं लिङ्गं एवं मृत्तिकया निर्मितं गोलकद्वयं स्त्रिपुरुषरूप-संसारस्य द्योतकः अस्ति।

यदि कण्ठनिर्माणे सानुकूलता न स्यात् चेत् स्थण्डिलनिर्माणं कर्तुं शक्यते। तस्मिन् अपि द्वौ प्रकारौ प्राप्येते। प्रथमं समेखलास्थण्डिलम् तथा द्वितीया मेखलारहितस्थण्डिलम्। केवलं हस्तमात्रं मेखलारहितं चतस्र अथवा एका अङ्गुलिपरिमितं उर्ध्व चतुरस्र स्थण्डिलं कर्तुं शक्यते।

कुण्डमध्ये विश्वकर्मा, प्रथममेखलायां विष्णुः, द्वितीयमेखलायां ब्रह्मा, तृतीयमेखलायां रुद्रः, नाभौ नाभिः, कुण्डस्य अन्तः भागे नैर्ऋत्यां वास्तुपुरुषः, एतेषां देवानां आवाहनं भवति पञ्चमेखलायुक्तस्य कुण्डस्योपरि क्रमेण श्वेतः, रक्तः, कृष्णः, पीतः, हरीतः वर्णः, भवति तथा क्रमेण मेखलायां विष्णुः, ब्रह्मा, रुद्रः, सूर्यः एवं इन्द्रस्य आवाहनं भवति।

अस्मिन् पाठे कुण्डपूजनविधेः क्रिया दर्शिता अस्ति, कुण्डपूजनं प्राग् दिग्रक्षणं भवति।

---

**दिग्रक्षणमन्त्राः**

**ॐ कृणुष्वा पाजः प्रसितिन्न पृथ्वीं याहि राजेवामवाँ२ऽइभेन।**
**तृष्वीमनु प्प्रज्ञितिन्द्रूणानेस्तासि विध्य रक्षसस्तपिष्ठैः॥**
**तव भ्रमासऽआशुया पतन्त्यनुस्पृश धृषता शोशुचानः।**
**तपू ँ ष्यग्ने जुह्वा पतङ्गान सन्दितो विसृजविष्वगुल्काः॥**
**प्रतिस्प्पशो विसृज तूर्णितमो भवा पायुर्विशोऽअस्याऽअदब्धः।**
**षोनोदूरेऽअधशंं सोयोऽअन्त्यग्ग्रेमाकिष्ट्वेव्यथिराद्धर्षीत्॥**
**उदग्नेतिष्ठप्रत्या तनुष्वन्यमित्रांर ऽओषतातिग्महेते।**
**यो नो दूरेऽअशतिंं समिधानचक्रेनीचातन्धक्ष्यत सन्नशुष्क्कम्॥**
**ऊद्ध्र्वो भव प्रतिविद्धया ध्यस्मदाविष्क्कृणुष्व दैव्यान्यग्ग्रे।**
**अवस्थिरातनुहियातु जूनाञ्जामिमजामिम्प्रमृणीहि-**
**शत्रून् अग्ग्नेष्वा तेजसा सादयामि॥**

## ॥ पंचगव्यकरणम् ॥

**ततः कांस्यपात्रे - मृण्मयपात्रे वा पृथक्-पृथक् मन्त्रान्ते पञ्चगव्यं क्षिपेत्।**

**मंत्रान्ते गोमूत्रम् क्षिपेत् -**

**मंत्रः -** **ॐ भूर्भुव स्वः। तत्सवितुर्व्वरेण्यम्भर्गो देवस्य धीमहि।**

**धियो यो नः प्रचोदयात्॥** **( शु. यजु. अ. 3, मंत्र 35 )**

**भावार्थः** - सवितुः देवस्य तस्य कल्याणकारिणः तेजसः वयं ध्यानंः कुर्मःयत् अस्माकं बुद्धिं प्रेरयेत्।

**मंत्रान्ते गोमयम् क्षिपेत् -**

**मंत्रः -** **मानस्तोके तनये मा नऽआयुषि मा नो गोषु मा नोऽअश्वेषु रीरिषः।**

**मा नोव्वीरान्नुद्र भामिनो वधीर्हविष्मन्तः सदमित्त्वा हवामहे॥** **( शु. यजु. अ. 16, मंत्र 16 )**

**भावार्थः** - हे रुद्र ! अस्माकं पुत्रेषु, पौत्रेषु, अस्माकं आयुषि, गोषु, अश्वेषु च पौनः पुन्येन क्रुद्धो मा भव। हे रुद्र! त्वम् अस्माकं वीरपुत्रान् अपि मा हिंसीः। वयं सर्वदा हविर्भिः तव आवाहनं कुर्मः।

**मंत्रान्ते क्षीरम् क्षिपेत् -**

**मंत्रः -** **आप्यायस्व समेतु ते व्विश्वतः सोमव्वृष्ण्यम्।**

**भवाव्वाजस्य सङ्गथे॥** **( शु. यजु. अ. 12, मंत्र 112 )**

**भावार्थः** - हे सोम ! सर्वस्मात् वीर्यं तव समीपे आगच्छतु। तेन वीर्येण त्वं सर्वतो वर्धस्व। किं च अन्नस्य सङ्गमननिमित्तं भव॥

**मंत्रान्ते दधि क्षिपेत् -**

**मंत्रः -** **दधिक्राव्णोऽअकारिषञ्जिष्णोरश्वस्य वाजिनः।**

**सुरभिनो मुखा करत्प्रणऽआयु ँ षि तारिषत्॥** **( शु. यजु. अ. 3, मंत्र 32 )**

**भावार्थः** - दधिक्राणः, जयशीलस्य, वेगवतः अश्वस्य संस्काराय वयं यत्किमपि असंस्कृतं भाषितवन्तः। अधुना अयं यज्ञः अस्माकं मुखानि पावयेत् अस्माकं आयुः च वर्धयेत्।

**मंत्रान्ते घृतं क्षिपेत् -**

**मंत्रः -** **तेजोसि शुक्रमस्यमृतमसि धामनामासि**

**प्रियन्देवानामनाधृष्टन्देवयजनमसि॥** **( शु. यजु. अ. 1, मंत्र 31 )**

**भावार्थः** - हे घृतम् ! त्वं तेजः असि, बलं वीर्यं च असि। त्वम् अमृतम् असि। त्वं सर्वेषां चित्तवृत्तिधारकं असि। धाम (आधारस्थानम्) नामधारकं असि। देवानां प्रियं रक्षोभिः अप्रतिहतं यज्ञसाधनम् असि।

**मंत्रान्ते कुशोदकम् क्षिपेत् -**

**मंत्रः -** **देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्याम्॥** **( शु. यजु. अ. 1, मंत्र 10 )**

**भावार्थः** - सवितुः देवस्य प्रसवे विद्यमानः अहं त्वां यजमानं अश्विनौः बाहुभ्यां पूष्णोः हस्ताभ्यां त्वाम् अभिषिञ्चामि।

**इति कुशोदकम् एकीकृत्य**

**गोमूत्रं गोमय क्षीरं दधि सर्पि कुशोदकम्।**

**सर्वस्थल विशुद्ध्यर्थं पञ्चगव्यं करोम्यहम्॥**

कुशैः ॐ इति प्रणवेन आलोड्य ॐ इति प्रणवेन अभिमन्त्र्य। कर्मभूमिं यज्ञसम्भारांश्च पञ्चगव्येन दर्भैः सम्प्रोक्षयेत् -

**मंत्रः -** **आपो हिष्ठा मयोभुवस्ता नऽऊर्जे दधातन।**

**महेरणाय चक्षसे॥** **(शु. यजु. अ. 36, मंत्र 14)**

**यो वः शिवतमो रसस्तस्य भाजयतेह नः।**

**उशतीरिव मातरः॥** **(शु. यजु. अ. 36, मंत्र 15)**

**तस्माऽअरङ्गमामवो यस्य क्षयाय जिन्वथ।**

**आपो जनयथा च नः॥**

**इति त्रिभिर्मन्त्रैः प्रोक्षणं कुर्यात्॥** **(शु. यजु. अ. 36, मंत्र 16)**

**भावार्थः** - हे जलदेवते! तस्य महतः रमणीयस्य च ब्रह्मणः दर्शनाय त्वम् अस्मान् बलयुक्तान्, अन्नयुक्तान्, कुरु। त्वयि विद्यमानं कल्याणकरं रसं तथा मातरः शिशूनां कृते पाययन्ति तथा भोगार्थं प्रापय। हे वारिदेवते! यस्य यजमानस्य यज्ञगृहे त्वम् अस्मान् प्रीणयसि तस्य यजमानस्य स्वर्गप्राप्यते त्वां स्म्पूर्णतया वयं प्राप्नुयाम। हे जलदेवते! अस्मानपि त्वं तस्यैव स्वर्गस्य अधिकारिणः भावय वा पुत्रपौत्रादिभावेन वर्धय।

**॥ इति ॥**

**॥ अथ भूम्यादि देवतानां पूजनम्॥**

**कुण्डस्याग्रे अक्षतपुञ्जोपरि पूगीफलानि संस्थाप्य हस्ते अक्षतान् गृहीत्वा भूमिकूर्मानन्तान् - आवाहयेत् ।**

**भूम्यावाहनम् -**

**भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री।**

**पृथिवींयच्छ पृथिवीन्दृ॑ꣳह पृथिवीम्मा हिꣳसीहि।** **(शु. यजु. अ. 13, मंत्र 8)**

**भावार्थः** - हे स्वयमातृण्णे! त्वं भूमिः (सुखानां भावयित्री) असि, पृथिवी असि, अदितिरूपा असि, समस्तस्य विश्वस्य धारिणी, विश्वधात्रि असि। त्वं पृथिवीं संयतां कुरु। त्वम् इमां चितिं दृढां कुरु। त्वम् इमां चितं मा हिंसीः।

**ॐ भूम्यै नमः - भूमिम् आवाहयामि स्थापयामि।**

**कूर्मावाहनम्**

**मंत्रः** **यस्य कुर्म्मो गृहे हविस्तमग्ने व्वर्धया त्वम्।**

**तस्मै देवाऽधिब्रुवन्नयञ्च ब्रह्मणस्पतिः॥** **(शु. यजु. अ. 17, मंत्र 52)**

**भावार्थः** - हे अग्ने! यस्य यजमानस्य गृहे देवेभ्यः हवींषि दद्मः तान् देवान् त्वं वर्धय। तस्य कृते देवाः ''अयं अस्माकं प्रियः अस्ति।'' इति अधिवदेयुः। तथा च अयं यजमानः वैदिककर्मणः पालकः भवतु।

**ॐ कूर्माय नमः - कूर्मम् आवाहयामि स्थापयामि।**

**अनन्तावाहनम् -**

**मंत्रः -** **स्योना पृथिवी नो भवान्नृक्षरा निवेशनी।**

**यच्छा न शर्म्म सप्रथाः॥** **( शु. यजु. अ. 36, मंत्र 13 )**

**भावार्थः** - हे पृथिवी! त्वम् अस्माकं कृते सुखस्वरूपिणी, अकण्टका वासयोग्या च भव। अस्मत्कृते सविस्तरं सुखप्रदा भव।

**ॐ अनन्ताय नमः अनन्तम् आवाहयामि।**

**वराहावाहनम् -**

**मंत्रः -** **खड्गो व्वैश्वदेवः श्वा कृष्णः कर्णो गर्द्दभस्तरक्षुस्ते रक्षसामिन्द्राय**

**सूकरः सिꣳहो मारुतः कृकलासः पिप्पका शकुनिस्ते शरव्यायै व्विश्वेषांदेवानांपृषतः॥**

**( शु. यजु. अ. 24, मंत्र 40 )**

**भावार्थः** - खड्गः (गेंडा) विस्वदेवदेवताकः वर्तते। कृष्णः स्वा एवं मृगः भक्षकः गर्दभः रक्षसाणां पशवः सन्ति। इन्द्राय सूकरः आलभ्यः वर्तते। मरुतद्देवताकः सिंहः अस्ति। कृकलासः (काकीडो) अश्वावृक्षः तथा पक्षी शख्यायै आलभ्यः अस्ति। पृषतः विश्वेदेवां पशुः अस्ति।

**ॐ वराहाय नमः - वराहम् आवाहयामि स्थापयामि।**

**मंत्रः -** **मनोजूतिर्ज्जुषतामाज्यस्य बृहस्पतिर्य्यज्ञमिमन्तनोत्त्वरिष्टँय्यज्ञ ꣳ समिमन्दधातु।**

**व्विश्श्वेदेवासऽइहमादयन्तामाँ ३म्प्रतिष्ठ॥** **( शु. यजु. अ. 2, मंत्र 6 )**

**भावार्थः** - मनोवेगवान् सविता इदं आहुतं धृतं सेवताम्, बृहस्पतिः अस्माकं इमं यज्ञं हिंसारहितं कृत्वा अविच्छिन्नं विस्तारयेत्, सः स्वयमेव इमं यज्ञं धारयेत्। अस्मिन् यज्ञे विश्वेदेवाः आनन्दिताः भवन्तु। ते सर्वे यज्ञं प्रेरयन्ताम्।

**ॐ भूम्यादि आवाहित देवताः सुप्रतिष्ठिताः वरदाः भवतः।**

**ॐ भूम्यादि आवाहित देवताभ्यो नमः - इति यथाशक्ति पूजनं कुर्यात्।**

**जलमादाय -**

**अनेन पूजनेन भूम्यादि देवताः प्रीयन्ताम् न मम।**

**उत्थाय अञ्जलौ पुष्पाण्यादाय अन्तरिक्षस्थदेवान् आवाहयेत्।**

**मंत्रः -** **स्वस्ति नऽइन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः।**

**स्वस्ति नस्तार्क्ष्योऽअरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु॥** **( शु. यजु. अ. 25, मंत्र 9 )**

**भावार्थः** - चिरन्तनकीर्तियुक्तः इन्द्रः अस्माकं कल्याणं कुर्यात्, सर्वविधधनस्य स्वामी पूषा अस्माकं कल्याणं कुर्यात्, अनुपहतगतिः तार्क्ष्यः (गरुडः) अस्माकं कल्याणं कुर्यात्, बृहस्पतिः अपि अस्माकं कल्याणकर्ता भवतु।

**मंत्रः -** **आ वो देवासऽईमहे व्वामम्प्रयत्यध्वरे।**

**आवो देवासऽआशिषो यज्ञियासो हवामहे॥** **( शु. यजु. अ. 4, मंत्र 5 )**

**भावार्थः** - हे देवाः! वयं प्रवर्तमाने अस्मदीये यज्ञे वननीयं यज्ञफलं साकल्येन युष्मान् याचामहे। हे देवाः! वयं यज्ञसंबन्धिफलानि आनेतुं युष्मान् आवाहयामः॥

**पुष्पं गृहीत्वा उत्थाय ॐ देवा: आयान्तु यातुधानाअपयान्तु विष्णोदेवयजनं रक्षस्व इति उच्चै - इति उच्चैर्वदनन्**

**ऊर्ध्वम् प्रक्षिपेत् -**

**मंत्रः -** **अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक्।**

**अहींश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्योधराचीः परासुव॥ ( शु. यजु. अ. 16, मंत्र 5 )**

**भावार्थः** - सर्वप्रधानः एवं देवलोकस्य एव मात्र वैद्यः प्रधानवक्ता शिवः, अस्मान् अधिकं कृत्वा वदेत् हे रुद्र! सर्वान् सर्पान् स्तंभनं कुर्वम् सर्वान् रक्षसान् अपि जडान् कारयित्वा तान् अधोः भाग क्षिपतु।

**मंत्रः -** **सा विश्वायुः सा विश्वकर्मा सा विश्वधायाः।**

**इन्द्रस्य त्वा भागꣳ सोमेनातनच्मि विष्णो हव्य ꣳ रक्ष॥ ( शु. यजु. अ. 1, मंत्र 4 )**

**भावार्थः** - अध्वर्युः मन्त्रेऽस्मिन् कथयति यत् सा गौः विश्वायुः इति नाम्नी वर्तते। सा एव गौः सर्वस्य विश्वस्य निर्माणस्य कर्त्री वर्तते तथा विश्वस्य धायाय नाम पाययित्री वर्तते। दुग्धामृतत्त्वेन भावितं जीर्णं सदबलहेतुर्भवामि, अनेन कारणेन हे क्षीर? इन्द्रस्य भागरूपे दुग्धे दधि प्रक्षिप्य कठिनं दधि करोमि, अतः हे विष्णो! भवान् अस्य हवनीयस्य दधिभाविनः दुग्धस्य रक्षणं करोतु॥

**मंत्रः -** **इयंव्वेदिः परोऽअन्तः पृथिव्याऽअयँय्यज्ञो भुवनस्य नाभिः।**

**अय ꣳ सोमो व्वृष्णोऽअश्श्वस्य रेतो ब्रह्मायवाचः परमँव्योम॥ ( शु. यजु. अ. 23, मंत्र 62 )**

**भावार्थः** - हे यजमानः इयं वेदिः पृथिव्याः परमोऽन्तः अस्ति। अयं यज्ञः एव भुवनस्य नाभिः अस्ति। अयं सोमः एव सेचकाश्वस्य वीर्यं एवं अयं ब्रह्मा एव तिसणां वाणीनां परव्योम अस्ति।

**मंत्रः -** **सुभूः स्वयम्भूः प्रथमोन्तम्महत्त्यर्णवे।**

**दधेहगर्भमृत्वियँय्यतोजातःप्रजापतिः॥ ( शु. यजु. अ. 23, मंत्र 63 )**

**भावार्थः** - विश्वस्य उत्पादकः स्वयंमेव धृत ब्रह्माण्ड शरीरः एवं सः अनादिनिधनः परम पुरुषः अस्ति। तेन तस्मिन् सृष्टि महार्णवे, महार्णवे काल प्राप्तः गर्भः धारितः। तस्मात् गर्भात् प्रजापतिः पुरुष उत्पन्नः जातः।

**भूमौ प्रादेशं कुर्यात् -**

**मंत्रः -** **इयत्त्यग्रेऽआसीन्मखस्य तेद्य शिरोराध्यासन्देवयजनेपृथिव्याः।**

**मखाय त्वा मखस्य त्वा शीर्ष्णे॥ ( शु. यजु. अ. 37, मंत्र 5 )**

**भावार्थः** - इयं भूमिः आदिकाले अति न्यूना आसीत्। हे भूमे! त्वया अद्य अहं पृथिव्याः देवयजन स्थाने यज्ञे यज्ञस्य शिरोभूतं महावीरघटं निष्पन्नं करिष्यामि। हे मृत्तिके ! यज्ञाय त्वां ग्रहणं करोमि।

**भूमिं स्पृष्ट्वा -**

**ॐ भूमिर्भूमिमवागान्माता मातरमप्यगात्।**

**भूयाम पुत्रैः पशुभिर्योनो द्वेष्टि स भिद्यताम्॥**

**इति प्रणमेत्॥**

## ॥ कुण्ड पूजनम्॥

**जलमादाय -**

**कर्मांगभूतं कुण्डदेवता पूजनमहं करिष्ये। हस्ते अक्षतान् गृहीत्वा कुंडमध्ये विश्वकर्माणम् आवाहयेत् -**

**मंत्रः -** **विश्वकर्मन्हविषा व्वर्द्धनेन त्रातारमिन्द्रमकृणोरवध्यम्।**

**तस्मै विशः समनमन्त पर्व्वीरयमुग्रो व्विहव्यो यथासत्।**

**उपयामगृहीतोऽसीन्द्राय त्त्वा विश्वकर्मणऽएषते योनिरिन्द्राय त्त्वा विश्वकर्म्मणे॥**

**( शु. यजु. अ. 8, मंत्र 46 )**

**भावार्थः** – हे विश्वकर्मन् ! वर्धमानेन हविषा त्वम् इन्द्रं जगतः रक्षकं हन्तुम् अशक्यम् अप्रतिभटं च कृतवान् असि। तस्मै इन्द्राय पूर्वे वसिष्ठादयः मनुष्याः सम्यङ्नताः। यतः कारणात् अयमिन्द्रः उग्रः, विविधेषु कार्येषु आहूयते तादृशः जातः अतः प्रजाः तस्मै नताः। हे विश्वकर्मन्! अयं तव हविष्यान्नस्य प्रभावः।

**श्लोक** – **ह्वी अज्ञानाज्ज्ञानतो वापि दोषो ये खननोद्भवाः।**

**नाशायत्वखिलांस्तांस्तु विश्वकर्मन्नमोऽस्तु ते॥**

ॐ भूर्भुवः स्वः भो विश्वकर्मन् इहागच्छ इहतिष्ठ **विश्वकर्मणे नमः – विश्वकर्माणम्** आ. स्था.।

**उपरि मेखलायां श्वेतवर्णायां विष्णुम् आवाहयेत्** –

**मंत्रः** – **इदंविष्णुर्विचक्रमे त्रेधा निदधे पदम्।**

**समूढमस्य पा<sup></sup>सुरे स्वाहा॥** **( शु. यजु. अ. 5, मंत्र 15 )**

**भावार्थः** – विष्णुना इदं सर्वम् अतिक्रान्तम्, सः त्रिवारम् स्वचरणम् अस्थापयत्। तस्य अनेन पांसुलेन पदन्यासेन हि सर्वः प्रपञ्चः विधृतः अस्ति।

**श्लोकः** – **ह्वी विष्णो यज्ञपते देव दुष्टदैत्य निषूदन।**

**विभो यज्ञस्य रक्षार्थं कुंडेऽस्मिन् संन्निधो भव॥**

ॐ भूर्भुवः स्वः भो विष्णो इहागच्छ तिष्ठ **विष्णवे नमः – विष्णुम्** आ. स्था.।

**मध्यममेखलायां रक्तवर्णायाम् ब्रह्माणम् आवाहयेत्॥**

**मंत्रः** – **ब्रह्मयज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो व्वेनऽआवः।**

**सबुध्न्याऽउपमाऽअस्यव्विष्ठाः सतश्चयोनिमसतश्च व्विवः॥ ( शु. यजु. अ. 13, मंत्र 3 )**

**भावार्थः** – पूर्वदिशायां सुन्दरकिरणयुक्तः, कमनीयः, महान् सूर्यः सर्वप्रथमः उदेति। सः प्रकटः भूत्वा अन्तरिक्षे विद्यमानान्, अस्पष्टान् किन्तु तत्रैव समाहितान् सदसत् पदार्थान् स्वप्रकाशेन अभिव्यक्तान् करोति।

**श्लोकः** – **हंसपृष्ठसमारूढ देव देवगणावृत।**

**रक्षार्थं मम यज्ञस्य कुण्डेऽस्मिन्सन्निधो भव॥**

ॐ भूर्भुवः भो ब्रह्मन् इहागच्छ इहतिष्ठ ब्रह्मणे नमः ब्रह्माणं आ. स्था.

अधो मेखलायां कृष्णवर्णायां रुद्रम् आवाहयेत् –

**मंत्रः** – **नमस्ते रुद्र मन्यवऽउतोतऽइषवे नमः।**

**बाहुभ्यामुतते ते नमः॥** **( शु. यजु. अ. 16, मंत्र 1 )**

**भावार्थः** – हे रुद्र! तव क्रोधाय नमस्कारः, तव बाणेभ्यः नमस्कारः, अपि च तव बाहुभ्यां नमः।

**श्लोकः** – **ह्रीं गंगाधर महादेव वृषारूढ महेश्वर।**

**आगच्छ भगवन् रुद्र कुंडेऽस्मिन् संन्निधो भव॥**

ॐ भूर्भुवः स्वः भो रुद्र इहागच्छ इह तिष्ठ **रुद्राय नमः – रुद्रं आ.स्था.।**

**योनिं -**

**शैवे योन्यां गौरीम् आवाहयेत् - वैष्णवे लक्ष्मीम् आवाहयेत् -**

**मंत्रः -** **अम्बेऽअम्बिकेम्बालिकेनमानयति कश्चन।**

**ससत्यश्वकः सुभद्रिकाङ्काम्पीलवासिनीम्॥ (शु. यजु. अ. 23, मंत्र 18)**

**भावार्थः** - हे अम्बे, अम्बिके, अम्बालिके न कोऽपि पुरुषः मां शीघ्रम्, अश्वं प्रापयति, अयं दुष्टः अश्वः तां काम्पीलवासिनां सुभद्रिकां नीत्वा सुप्तः अस्ति।

**श्लोकः -** **ह्री सेवंते महती योनिं देवर्षिसिद्धमानवाः।**

**चतुरशीति लक्षाणि पन्नगाद्याः सरीसृपाः॥**

**पशवः पक्षिणः सर्वे संसरन्ति यतो भुवि।**

**योनिरित्येव विख्याता जगदुत्पत्ति हेतुका॥**

**मनोभवयुता देवी रति सौख्यप्रदायिनी।**

**मोहयित्री सुरान् सर्वान् जगद्धात्रि नमोऽस्तुते॥**

ॐ भूर्भुवः स्वः भो गौरि इहागच्छ इह तिष्ठ **गौर्यै नमः - गौरीम्** आ. स्था.।

ॐ भूर्भुवः स्वः भो लक्ष्मि इहागच्छ इह तिष्ठ **लक्ष्म्यै नमः - लक्ष्मीम्** आ. स्था.।

**सूर्यम् - (दक्षिण गोलार्धे सूर्यम् आवाहयेत्-) (विष्णवर्चन कल्पलता अनुसार)**

**मंत्रः -** **आकृष्णेनरजसावर्तमानो निवशयन्नमृतम्मर्त्यञ्च।**

**हिरणमयेन सविता रथेना देवो याति भुवनानि पश्यन्॥ (शु. यजु. अ. 33, मंत्र 43)**

**भावार्थः** - कृष्णेन प्रकाशेन सह वर्तमानः सूर्यः मनुष्यान् देवान् च स्वस्वस्थानेषु प्रतिष्ठापितान् कुर्वन्, लोकलोकान्तरान् पश्यन् स्व-स्वर्णिमेन रथेन संचरति।

**श्लोकः -** **ह्रीं दिवाकर सहस्राशों सुरासुरनमस्कृत।**

**लोकनाथ विश्वनेत्र योन्यां संनिहितो भव॥**

**ॐ भूर्भुवः स्वः भो सूर्य इहागच्छ इह तिष्ठ सूर्याय नमः - सूर्यम् आ. स्था.।**

**चन्द्रः - उत्तर गोलार्धे चन्द्रम् आवाहयेत् - ) (विष्णवर्चन कल्पलता अनुसार)**

**मंत्रः -** **इमन्देवाऽअसपत्नꣳ सुवद्धवम्महते क्षत्राय महते ज्यैष्ठ्याय महते जानराज्यायेन्द्रिस्येन्द्रियाय।**

**इमममुष्य पुत्रममुष्यै पुत्रमस्यै विशऽएषवोमीराजासोमोस्माकम्ब्राह्मणाना ꣳ राजा॥**

**(शु. यजु. अ. 10, मंत्र 18)**

**भावार्थः** - हे देवाः! सवित्रादयः! इमं यजमानं सपत्नरहितं कृत्वा महत्यै क्षत्रपदव्यै, महते ज्येष्ठभावाय, महते जनानाम् आधिपत्याय प्रेरयध्वम्। इन्द्रस्य परमोत्कृष्टाय बलाय प्रेरयध्वम्। अमुष्य (यजमानस्य पितुः नाम) पुत्रम्, अमुष्याः (यजमानस्य मातुः नाम) देव्याः पुत्रम्, स्याः कौरव्याः प्रजायाः अधिपतिं प्रेरयध्वम्। हे कुरवः, पञ्चालाः! युष्माकमेषः खदिरवर्मा राजा अस्तु। अस्माकं ब्राह्मणानां तु चन्द्रवतीरूपः सोमः वा राजा अस्तु।

**श्लोकः -** **ह्रीं हिमरश्मे निशानाथ तारकाभिः समन्वित।**

**आह्लादप्रद देवेश योन्यां संनिहितो भव॥**

ॐ भूर्भुवः स्वः भो चंद्र इहागच्छ इह तिष्ठ **चंद्राय नमः - चंद्रम्** आ. स्था.।

**कण्ठम् आवाहयेत्** –

**मंत्रः** – **नीलग्रीवाः शितिकण्ठा दिवः ६ रुद्राऽउपश्रिताः।**

**तेषा सहस्रयोजनेवधत्त्वानितन्मसि॥** **( शु. यजु. अ. 16, मंत्र 56 )**

**भावार्थः** – नीलग्रीवाः, श्वेतवचनाः, ये रुद्राः द्युलोकमाश्रित्य स्थिताः तेषां धनुंषि वयं अस्मत्तः सहस्रयोजनं दूरं क्षिपामः।

**श्लोकः** – **ह्रीं जीवनं सर्वजन्तूनां स्त्रगादि स्थानमुत्तम्।**

**उत्तमांगस्यचाधारं कण्ठमावाहयाम्यहम्॥**

ॐ भूर्भुवः स्वः भो कंठ इहागच्छ इह तिष्ठ **कण्ठाय नमः** – **कण्ठम्** आ. स्था.।

**नाभिम् आवाहयेत्** –

**मंत्रः** – **नाभिर्म्मे चित्तंविज्ञानम्पायुर्मेपचितिर्भसत्।**

**आनन्दनन्दावाण्डौ मे भगः सौभाग्यम्पसः।**

**जङ्घाब्भ्यापद्भ्यांन्धर्मेस्मि विशि राजा प्रतिष्ठितः॥** **( शु. यजु. अ. 20, मंत्र 9 )**

**भावार्थः** – मम नाभिः, चित्तं ज्ञानरूपमस्तु। मम गुदेन्द्रियं ज्ञानजनितसंस्काराधारमस्तु। स्त्रीप्रजननम् प्रजारूपमस्तु सुभगमस्तु। वृषणौ आनन्देन भरितौ स्तः लिङ्गं सौभाग्ययुक्तं भवेत्। जङ्घभ्यां पद्भ्यां च अहं धर्मः अस्मि। धर्मरूपत्वादेव प्रजायां राजारूपेण प्रतिष्ठितः अस्मि।

**श्लोकः** – **पद्माकाराथवा कुण्डसदृशाकृतिसंयुता।**

**आधारः सर्वकुण्डानां नाभिमावाहयाम्यहम्॥**

ॐ भूभुर्वः स्वः भो नाभे इहागच्छ इह तिष्ठ **नाभ्यै नमः** – **नाभिम्** आ. स्था.।

**कुंडस्य नैऋत्यां वास्तुम् आवाहयेत्** –

**मंत्रः** – **ॐ वास्तोष्पते प्रतिजानीह्यस्मान् स्वावेशोऽअनमीवो भवानः।**

**यत्वेमहे प्रतितन्नो जुषस्व शन्नो भव द्विपदे शञ्चतुष्पदे॥**

**भावार्थः** – हे वास्तोष्पते ! अस्मान् प्रति जागृहि। त्वम् अस्मान् सुष्ठुतया प्रवेशयुक्तान्, रोगरहितान् भावय। यत् भवतः वाञ्छामः तदस्मभ्यं देहि। अपि च अस्माकं (पुत्रादीन्) चतुष्पदः (पशून्) प्रति शान्तिदो भव।

**श्लोकः** – **ह्रीं आवाहयामि देवेशं वास्तुदेवं महाबलम्।**

**देवदेवं गणाध्यक्षं पातालतलवासिनम्॥**

ॐ भूर्भुवः स्वः भो वास्तुपुरुष इहागच्छ इह तिष्ठ **वास्तुपुरुषाय नमः** – **वास्तुपुरुषम्** आ. स्था.।

कुण्ड पुरतः बलिं संस्थाप्य – ॐ वास्तुपुरुष बलिद्रव्याय नमः इति संपूज्य।

ॐ वास्तुपुरुषाय नमः अमुं बलिं समर्पयामि।

**जलमादाय** – अनेन बलिदानेन वास्तुपुरुषः प्रीयताम् न मम॥

**प्रार्थयेत्**

ॐ यस्य देहे स्थिता क्षोणी ब्रह्मांडं विश्वमंडलम्। व्यापिनं भीमरूपं च सुरूपं विश्वरूपिणम्॥

पितामहसुतं मुख्यं वंदे वास्तोष्पतिं प्रभुम्। वास्तुपुरुषदेवेश सर्वविघ्नहरो भव॥

शान्तिं कुरु सुखं देहि सर्वान् कामान् प्रयच्छ मे॥

(''कुंड मध्ये'' गंधादिना त्रिकोणं, षट्कोणं तदुपरि अष्टदल पद्मं कृत्वा तस्मिन् - ब्रह्मणे नमः - विष्णवे नमः - रुद्राय नमः - ऋग्वेदाय नमः - यजुर्वेदाय नमः - सामवेदाय नमः - अथर्ववेदाय नमः - कूर्माय नमः - अनंताय नमः - हिरण्यगर्भाय नमः - श्रीकंठाय नमः - धनदाय नमः - शिवाय नमः - धर्माय नमः - सूर्याय नमः - इति ब्रह्मादिदेवान् गंधादिभिः पूजयेत्।)

**यथाशक्ति पूजनम् - प्रार्थयेत् :**

आवाहयामि तत्कुण्डं विश्वकर्मविनिर्मितम्। शरीरं यच्चते दिव्यमग्न्यधिष्ठानमद्भुतम्॥

ये च कुण्डे स्थिरता देवा कुण्डांगे याश्च संस्थिताः। ऋद्धिम् यच्छन्तु ते सर्वे यज्ञसिद्धिं मुदान्विताः॥

हे कुण्ड तव रूपं तु रचितं विश्वकर्मणा। अस्माकं वांछितां सिद्धिं यज्ञसिद्धिं ददस्व नः॥

**जलमादाय** - अनया पूजया कुण्डस्थदेवताः प्रीयन्ताम् न मम॥

**॥ इति ॥**

**कुण्डस्थित-मेखला-देव-वर्ण कोष्टकम्**

| मेखला | देवता | वर्णः |
|---|---|---|
| प्रथमा | विष्णुः | श्वेतः |
| द्वितीया | ब्रह्मा | रक्तः |
| तृतीया | रूद्रः | कृष्ण |
| चतुर्थी | सूर्यः | पीतः |
| पञ्चमी | इन्द्रः | हरीतः |

**कुण्ड दिग् - नाम - फल - कोष्टकम् नवकुण्डज्ञानम्**

| दिग् | कुण्डनामानि | कुण्डफलम् |
|---|---|---|
| पूर्वः | समचतुरस्त्रः | कार्यसिद्धिः |
| अग्निः | योनिः | पुत्रप्राप्तिः |
| दक्षिणः | अर्धचन्द्रः | कल्याणम् |
| नैऋत्यः | त्रिकोणः | शत्रुनाशः |
| पश्चिमः | वृत्तः | शान्तिप्राप्तिः |
| वायव्यः | षडस्त्रः | मारणम्/उच्छेदनम् |
| उत्तरः | पद्मः | वर्षाकारकः |
| ईशानः | अष्टास्त्रः | आरोग्यप्राप्तिः |

**शब्दार्थाः**

**सम्प्रोक्षयेत्** मार्जनं कुर्यात्, **रीरिषः** रोषं मा कुरु, **भामिनः** क्रोधिनः/तेजस्विनः, **विश्वधाया** - जगद्धारिणी, **शर्म**-सुखम्, **मन्यवे** क्रोधाय, **उपश्रिताः** आश्रिताः, **धन्वानि** धनुष्याणि।

## स्वाध्यायः

**1. कोष्ठकप्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा रिक्तस्थानानि पूरयत।**

(1) पञ्चव्यकरणे .......... पदार्थाः। (सप्त/त्रयः/पञ्च)

(2) पञ्चव्यकरणे गोमूत्रप्रक्षेपार्थं ..........मन्त्रः अस्ति। (मानस्तोके तनये/तत्सवितुर्व/दधिक्राव्णो)

(3) पञ्चगव्यकरणे दधिप्रक्षेपार्थं .......... मन्त्रः अस्ति। (दधिक्राष्णो/तेजोसि शुक्र/देवस्य त्वा सवितु)

(4) अनन्तदेवस्य आवाहने .......... देवस्य आवाहनं भवति। (वराहस्य/सर्पस्य/गरुडस्य)

(5) कुण्डस्य .......... कोणे भूम्यादिदेवतानाम् आवाहनं भवति। (वायव्यकोणे/अग्निकोणे/नैऋत्यकोणे)

(6) कुण्डस्य नैऋत्यकोणे ......... देवस्य आवाहनं भवति। (भैरवस्य/वास्तुपुरुषस्य/भूमैः)

(7) कुण्डपूजने प्रथममेखलायां .......... देवस्य आवाहनं भवति।(रुद्रस्य/विष्णोः/ब्रह्मणः)

(8) कुण्डस्य रचयिता .......... देवः अस्ति। (वास्तुपुरुषः/विश्वकर्मा/कुबेरः)

**2. निम्नलिखितप्रश्नानाम् एकवाक्येन उत्तरं लिखत।**

(1) कुण्डपूजनात् पूर्वं भूमौ केषां देवतानाम् आवाहनम् भवति?

(2) द्वितीयमेखलायां कस्य आवाहनं भवति?

(3) पञ्चममेखलायां कस्य आवाहनं भवति?

(4) आज्यम् अर्थात् किम्?

(5) कुण्डस्य विकल्पे कस्य निर्माणं भवति?

(6) देवानाम् आगमनं कुत्र भवति?

(7) तृतीय मेखलायाः वर्णः कः?

**3. निम्नलिखितप्रश्नानाम् द्वित्रवाक्यैः उत्तरं लिखत।**

(1) कुण्डस्य योनि स्थाने कस्याः पूजनं भवति?

(2) पंचगव्य कस्मिन् पात्रे ग्रहणीयम्?

(3) भूम्यादि देवतानां नामानि लिखत?

(4) पञ्चमेखलायाः देवतायाः नामानि उपरितः क्रमेण देवानां नामानि लिखत?

(5) पञ्चमेखलायाः वर्ण नामानि उपरितः क्रमेण वर्णानां नामानि लिखत?

**4. निम्नलिखितप्रश्नानाम् सविस्तरम् उत्तरं लिखत।**

(1) पञ्चगव्यकरणं लिखतु।

(2) अन्तरिक्षस्थदेवानाम् आवाहनं कया रीत्या भवति।

(3) कुण्डविषयं चर्चयत्।

**5. निम्नलिखित मन्त्राणां पूर्तिं कृत्वा अर्थं लिखत।**

(1) आप्यायस्व........ ॥

(2) यस्यकुर्मो......... ॥

(3) आवो देवास......... ॥

(4) नमस्ते रुद्र......... ॥

(5) नीलग्रीवाः शितिकण्ठाः ......... ॥

**6. निम्नलिखित श्लोकानाम् पूर्तिं कुरुत।**

(1) गोमूत्रंगोमय...... ॥

(2) अज्ञानाज्ज्ञानतो .... ॥

(3) आवाहयामि तत्कुण्डं.... ॥

(4) यस्य देहे स्थिता..... ॥

(5) हे कुण्ड तव.... ॥

**छात्रप्रवृत्तिः**

छात्रैः सम्पूर्ण कुण्डपूजनप्रयोगः कर्तव्यः।

**अध्यापकप्रवृत्तिः**

अध्यापकेन सम्पूर्णप्रयोगः छात्रैः सह यज्ञकुण्डनिर्माणं कृत्वा वा यज्ञशालायां गत्वा प्रायोगिकरूपेण सम्पादनीयः।

●

# १२ पञ्चभूसंस्कारः

**प्रस्तावना**

**''यज्ञो वै विष्णुः''**



अर्थात् साक्षात् यज्ञः एव पुराणपुरुषोत्तमस्य विष्णोः स्वरूपं वर्तते। भारतीयसंस्कृतौ यज्ञानां महत्त्वं विशेष रूपेण विद्यते। अस्माकम् ऋषयः पूर्वजाः यज्ञकर्म अहर्निशम् उपासन्ते संप्रतिः यज्ञाना महत्वं विद्यते एव। प्रत्येकस्मिन् यज्ञे पञ्चभूसंस्कारः क्रियते। पञ्चभूसंस्कारस्य का आवश्यकता? इति प्रश्नम् समादाय चर्चा अत्र प्रस्तूयते।

पञ्चभूसंस्काराः भूमेः क्रियन्ते स एव पञ्चभूसंस्कारः।

(1) परिसमूहनम् (2) उपलेपनम् (3) उल्लेखनम् (4) उद्धरणम् (5) अभ्युक्षणम् इति पञ्च भूमेः संस्काराः सन्ति।

मानवानां जीवने यथा षोडशसंस्काराणाम् आवश्यकता वर्तते तथैव यज्ञकर्मणि पञ्चभूसंस्कारस्य अत्यत्तां□मावश्यकता वर्तते। अस्माकं संस्कृतौ पवित्रतायाः प्रथमं स्थानम् विद्यते। पञ्चभूसंस्कारस्य प्रयोजनमेव भूमेः पवित्रीकरणमिति। भूमिविशुध्यर्थं क्रियमाणः संस्कारः पञ्चभूसंस्कारः इति।

पञ्चानाम् संस्काराणाम् पृथक्-पृथक् महत्वं विद्यते। पञ्चसंस्काराणाम्पृथक् देवताः सन्ति। तेषु पञ्चभूसंस्कारेषु के के देवताः निवसन्ति। तद्यथा -

**समूहने कश्यपश्च लेपने त्वश्विनौ तथा।**

**मित्रावरुणावुल्लेखे ह्युद्धृत्ये चाऽग्निदेवताः।**

**अभ्युक्षणे च गन्धर्वाः वह्नि-स्थापन-देवताः॥**

समूहनसंस्कारे कश्यपः, लेपने अश्विनौ, उल्लेखे मित्रावरुणौ, उद्धृत्ये अग्निः, अभ्युक्षणे गन्धर्वाः, इति देवाः निवसन्ति।

---

**॥ अथ पञ्चभूसंस्कारः॥**

### (1) परिसमूहनम्

संकल्पः - ॐ यद्देवा इतित्र्युचस्य प्रजापतिर्ऋषिः उष्णीक्छन्दः क्रमेण

अग्निवायुसूर्यादेवताः परिसमूहने विनियोगः॥

**मंत्रः -** **ॐ यद्देवादेवहेडनन्देवासश्चकृमाव्वयम्।**

**अग्निर्म्मातस्मादेनसो विश्वान्मुञ्चत्त्वꣳ हसः॥ (20/14)**

**मंत्रः -** **ॐ यदि दिवा यदि नक्तमेनाᳪ सिचकृमा व्वयम्।**

**व्वायुर्म्मातस्मादेनसो विश्श्वान्मुञ्चत्त्वᳪ हसः॥ (20/15)**

**मंत्रः -** **ॐ यदि जाग्रद्यदि स्वप्नऽएनाᳪ चकृमा वयम्।**

**सूर्यो मातस्मादेनसो विश्वान्मुञ्चत्वᳪ हसः॥ (20/16)**

**भावार्थः** – हे देवाः! अस्माभिः ये केऽपि देवापराधाः कृताः तैः सर्वैः पापैः अग्निः मां मोचयतु। यदि दिने वा रात्रौ वयं पापकर्माणि कुर्मः तर्हि तैः पापैः वायुः मां मोचयतु। यदि जागृताऽवस्थायाम् वा सुषुप्ताऽस्थायाम् वयं पापानि कुर्मः तर्हि तै सर्वैः पापैः सूर्यः मां मोचयतु।

कनिष्ठाङ्गुष्ठमध्यतः मूलधृतैः त्रिभिः दर्भैः दक्षिणत उदक्संस्थं त्रिभिः परिसमूहनम्॥ एवं त्रिभिः परिसमूहय परिसमूहय परिसमूहय, तान् कुशान् ऐशान्यां पूर्वतो परित्यजेत्।

**ह्रीं कृमिकीटपतंगाद्या विचरन्ति महीतले।**

**तेषाम् संरक्षणार्थाय परिसमूहमुच्यते॥**

**श्लोकार्थः** – कृमिकीटकानां भूमौ विचरतां संरक्षणाय परिसमूहनकर्म क्रियते।

**(2) उपलेपनम्**

**विनियोगः** – ॐ मानस्तोके इत्यस्य कुत्सऋषिः जगतीच्छन्दः एको रुद्रो देवता गोमयोदकेन उपलेपने विनियोगः॥

**मंत्रः -** **ॐ मानस्तोकेतनयेमानऽआयुषिमानोगोषुमानो ऽअश्वेषुरीरिषः।**

**मानोविरान्नुद्रभामिनो वधीर्हविष्मन्तःसदमित्त्वाहवामहे॥ (16/16)**

**भावार्थः** – हे रुद्र त्वम् अस्माकं पौत्रेषु, पुत्रेषु अस्माकं आयुषः वा गौरश्वानां विषये वारं वारं क्रुद्धो मा भव! हे रुद्र! त्वं अस्माकं क्रुद्धान् वीरान् अपि मा (न) मारय। वयं सदा सर्वदा हि हविर्युक्तो भूत्वा तव आवाहनं कुर्मः।

अनेन मन्त्रेण दक्षिणत उदकसंस्थं गोमयोदकेन त्रिवारं उपलेपयेत् एवं मनसि शुभसंस्काराणाम् आरोपणम् करोमि इति भावयेत्।

**गोमये वसते लक्ष्मीः पवित्रा सर्वमंगला। पवित्रं सर्वकार्येषु तस्मात्तेनोपलेपनम्॥**

**(3) उल्लेखनम्**

ॐ इदंविष्णुरित्यस्य मेधातिथिऋषिः गायत्रीछन्दः विष्णुर्देवता उल्लेखने विनियोगः॥

**मंत्रः -** **ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्।**

**समूढमस्य पाᳪ सुरे स्वाहा॥ (5/15)**

**भावार्थः** – विष्णुः इदं जगत् भूम्यतन्तरिक्षद्युलोकेषु विक्रान्तवान्। अग्निवायुसूर्यरूपेण त्रिधा निहितवान्। अस्य रजस्वले प्रदेशे पदविन्यासे एव सम्यगन्तर्भूतम् इदं विश्वं विधृतमस्ति। तस्मै विष्णवे हविर्दत्तम्। इत्यनेन खदिरेण हस्तमात्रेण खड्गाकृतिना रुक्येन स्रुवमुलेन यज्ञकाष्ठेन कुशैर्वा दक्षिणत उदक्संस्थाः स्थंडिलपरिमाणा द्वादशाङ्गुला वा तिस्रो रेखाः कुर्यात्।

**बौधायनगृह्यसूत्रे** - उल्लेखनम् केन माध्यमेन करणीयम्, तत्र लिखितमस्ति

तद्यथा -

**भवेन्नखेन कुनस्ति काष्ठेन व्याधिमृच्छति।**

**अश्मना धननाशः स्यान्मृन्मयेन कलिर्ध्रुवम्॥**

**फलेन सुसमृद्धः स्यात् पुष्पेण श्रीयमृच्छति।**

**पर्णेन धनलाभः स्यादीर्घमायुः कुशेन तु॥**

**तस्मात्फलेन पुष्पेण पर्णेनाथ कुशेन वा।**

**ताम्रशल्कपुतेतादौ लिखेत्स्थंडिलमुत्तमम्॥**

**(4) उद्धरणम्**

ॐ स्योना पृथिवीत्यस्य मेधातिथिर्ऋषीः गायत्री छन्दः पृथ्वी देवता उद्धरणे विनियोगः॥

**मंत्रः** - **ॐ स्योना पृथिवीनो भवान्नृक्षरा निवेशनी।**

**यच्छानः शर्मसप्प्रथाः॥ (36/13)**

**भावार्थः** - हे पृथिवि ! त्वम् अस्माकं सुखरूपा अकण्टका साधुप्रतिष्ठाना च भव। अस्मान् सर्वतः पृथुः शरणम् यच्छ॥

इति मन्त्रेण प्रतिरेखातः अङ्गुष्ठानामिकाभ्याम् अङ्गुष्ठात् अनामिकापर्यन्तम् त्रिवारम् पांसूनुद्धृत्य प्रांचमुद्धरेत्।

**ये भ्रमन्ति पिशाचाद्या ह्यन्तरिक्षनिवासिनः।**

**तेषां प्रहरणार्थाय समुद्रध्रः कथितो बुधैः॥**

**(5) अभ्युक्षणम्**

**मंत्रः** - ॐ देवस्यत्वेत्यस्य प्रजापत्यश्विनसरस्वतीन्द्राऋषयः धृतिश्छन्दः अश्विनसरस्वतीन्द्रादेवताः अभ्युक्षणे विनियोगः॥

**मंत्रः** - ॐ देवस्यत्वा सवितुः प्रसवेश्विनोर्बाहुभ्याम्पुष्णो हस्ताभ्याम्।

**अश्विनौ भैषज्येन तेजसे ब्रह्मवर्चसायाभिषिञ्चामि सरस्वत्यै भैषज्येन**

**वीर्यायान्नाद्यायाभिषिञ्चामिन्द्रस्येन्द्रियेण बलाय श्रियै यशसेऽभिषिञ्चामि॥**

**भावार्थः** - आसंदे स्थितस्य यजमानोपरि अध्वर्युः जलम् सिंचेत्! हे यजमानः! सवितुः देवस्य अनुज्ञायां वर्तमानम् अहम् अश्विनयोः वैद्यकर्मणः कारणात् तेजः एवं ब्रह्मवर्चसः प्राप्यते आसिंचामि। सरस्वत्याः भैषज्यात् अहम् त्वाम् वीर्यः तथा अन्नम् एवम् अन्नभोगानां सामर्थ्याय आसिञ्चामि। इंद्रस्य इन्द्रबलेन बलाय, श्रीयै एवम् यशार्थम् आसिञ्चामि।

इति मंत्रेण प्रतिरेखां न्युब्जमुष्टिना प्राजापत्यतीर्थेन उदकेन त्रिरभ्युक्षेत्।

**आपो देवगणाः सर्वे आपः पितृगणाः स्मृता।**

**तेनैवाभ्यूक्षणप्रोक्तमृषिभिर्वेदवादिभिः॥**

**शब्दार्थाः**

**आपः** जलं, तोयम्, **यज्ञः** मखः, अध्वरः, **भूः** मही, मेदिनी **वह्निः** अग्निः, अनलः **अश्वेषु** वाजिषु, तुरगेषु **बुधैः** पण्डितैः, विद्वद्धिः **सवितुः** सूर्यस्य॥

## स्वाध्यायः

**1. कोष्ठकप्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा रिक्तस्थानानि पूरयत।**

(1) यज्ञो वै ..........। (रुद्रः, विष्णुः, ब्रह्मा)

(2) प्रत्येकस्मिन्यज्ञे .......... संस्कारः क्रियते। (अन्नप्राशन, कर्णवेध, पञ्चभू)

(3) समूहने .......... देवः निवसति। (कश्यपः, अग्निः, वरुणः)

(4) उद्धृत्ये .......... देवः निवसति। (मित्रः, अश्विनौ, अग्निः)

(5) गोमये वसते ..........। (सरस्वती, महाकाली, लक्ष्मी)

(6) मानस्तोके इत्यस्य ......... ऋषिः वर्तते। (बृहस्पतिः, कुत्सः, मेधातिथिः)

(7) कृमिकीटपतंगाद्यानां संरक्षणाय .......... उच्यते।(उपलेपनम्, परिसमूहनम्, उल्लेखनम्)

**2. निम्नलिखिप्रश्नानाम् एकवाक्येन उत्तरं लिखत।**

(1) यज्ञः कस्य स्वरूपः वर्तते?

(2) पंचसंस्काराः कस्याः क्रियन्ते?

(3) लेपनसंस्कारे कः देवः निवसति?

(4) अभ्युक्षणे के निवसन्ति?

(5) उल्लेखने कः ऋषिः वर्तते?

(6) स्योना - इति मंत्रस्य ऋषिः कः?

(7) पिशाचाद्यानां प्रहरणार्थाय कः संस्कारः भवति?

**3. निम्नलिखित प्रश्नानां सविस्तरम् उत्तरं लिखत।**

(1) पञ्चभूसंस्कारस्य महत्वं लिखत?

(2) पञ्चभूसंस्कारानामानि विलिख्य वह्निस्थापनदेवतानां विवेचनं कुरुत।

(3) यथेच्छ द्वयोः संस्कारयोः ग्रंथानुसारम् वर्णनम् कुरुत।

**4. निम्नलिखित मन्त्राणां पूर्तिं कृत्वा अर्थं लिखत।**

(1) ॐ मानस्तोके ........।

(2) ॐ इदं विष्णु ........।

(3) ॐ स्योनापृथिवि .........।

(4) ॐ यद्देवा देवहे .........।

(5) ॐ यदि दिवा .........।

**5. मेलनम् कुरुत।**

| **अ** | **ब** |
| --- | --- |
| (1) परिसमूहनम् | अश्विनौ |
| (2) उद्धरणम् | कश्यपः |
| (3) उल्लेखनम् | गंधर्वाः |
| (4) उपलेपनम् | मित्रावरुणौ |
| (5) अभ्युक्षणम् | अग्निः |

**छात्रप्रवृत्तिः**

स्फोरकपत्रे (चार्टपेपरमध्ये) पञ्चभूसंस्कारस्य संक्षिप्त परिचयः वह्निस्थापनदेवतानां नामानि च लिखन्तु।

**अध्यापकप्रवृत्तिः**

अध्यापकः पञ्चभूसंस्कारे कुशादिपदार्थानां महत्त्वं बोधयेत्।

●

# १३ नामकरणसंस्कारः

**प्रस्तावना**

संस्कारशब्दः सम् उपसर्गेण सह कृ धातुना साधितोऽस्ति। वेदेषु ब्राह्मण ग्रन्थेषु च संस्कार शब्दः पवित्रतार्थे प्रयोजितो दृश्यते। उन्नतजीवनाय मानवानां कृते जीवनस्य विभिन्नावस्थासु प्रवेशसमये यो विधिः **संस्कारविधिः** कथ्यते। वस्तुतः यया क्रियया शरीरं, मनः तथा आत्मा उत्तमाः भवन्ति सः संस्कारः कथ्यते। चरक ऋषिणापि उक्तं सद्गुणानामाधानं संस्कारः कथ्यते।

वैदिकसंस्कृतौ संस्काराः मानवानां नवनिर्माणं कुर्वन्ति। संस्कारैः संस्कृतेः रक्षा भवति। संस्काराणां विविधाः उद्देश्याः सन्ति तद्यथा उपनयनसंस्कारस्य उद्देश्यः आध्यात्मिकः एवं सांस्कृतिकश्च वर्तते ततः वेदारम्भस्य मार्गः उद्घाटीतो भवति मनोवैज्ञानिक महत्वं अपि अस्ति। इत्थं सर्वेषां संस्काराणां महत्वं विद्यते।

अत्र पाठेऽस्मिन् वयं नामकरणसंस्कार-विषये पठिष्यामः।

---



षोडशसंस्कारेषु पञ्चमः संस्कारः नामकरणसंस्कारः इति कथ्यते। संस्कारेऽस्मिन् बालकस्य गुणदर्शनं कृत्वा नामकरणं भवति। जन्मतः दशरात्रि अनन्तरं एकादशे दिवसे शुभनक्षत्रे बालकस्य नामकरणं भवति। प्रथमं नक्षत्राधारितं नाम भवति - तस्य ज्ञानं जातकस्य मातुः पितुः कृते भवति। यज्ञयागादिक्रियासु संकल्पे नक्षत्रनाम्नः उच्चारणं भवति। ब्राह्मणजाकतानां नाम मङ्गलसूचकं, क्षत्रियाणां शौर्यसूचकं, वैश्यानां ऐश्वर्यसूचकं तथा च शूद्राणाम् सेवाभक्तिसूचकं भवति। ब्राह्मणानां नामान्ते ''शर्मा'' क्षत्रियाणां नामान्ते 'वर्मा' वैश्यानां नामान्ते ''गुप्तः'' तथा च शूद्राणां नामान्ते ''दासः'' इति योजितं भवति। राशिनक्षत्रादीनाम् अक्षराणां विचारं कृत्वा संस्कारोऽयं संपन्नो भवति। नामोच्चारणं सरलं भवेत्, तत्र अल्पाक्षराःस्युःसंयुक्ताःअक्षराःअधिकाःनैवस्युःतथां च सार्थकं नाम करणीयंतेन संततिः संस्कारमयी मानसम्मानदायिका च भवति नाम कृत्प्रत्ययाधारितं स्यात् तद्धितं न स्यात्। अरिनाम्ना प्रसिद्धम् न स्यादित्यस्माभिः ध्यातव्यम्। नामकरणसंस्कारप्रभावात् जातकस्य आयुर्वृद्धिः व्यावहारिकज्ञानवृद्धिः च जायते। नामकरणसंस्कारस्य प्रारम्भे गणपतिपूजनं संपाद्य अधः प्रदत्ताः विधयः करणीयाः।

**नामकरणसंस्कारप्रयोगविधिः**

आचम्य प्राणानायम्य.... सुमुखश्चेत्यादि....

**संकल्पः** - मम कुमारस्य नामकरणस्य स्वकालाकृतजनितदोपप्रत्यवायपरिहारर्थं पादकृच्छ्ररूपं प्रायश्चितं रजतप्रत्याम्नायद्वारा अहमाचरिष्ये। अनेन पादकृच्छ्ररूपं प्रायश्चितकृतेन मम अस्य कुमारस्य नामकरणस्वकालाति-क्रमदोषनिवृत्तिपूर्वकं नामकरणसंस्कारकरणे अधिकारसिद्धिरस्तु॥

**पुनः जलमादाय।**

मम अस्य कुमारस्य नामकर्मणि अधिकारार्थं सुत्रोक्तान् त्रिभ्योधिकान् ब्राह्मणान् यथाकाले भोजयिष्ये। तेन ममास्य कुमारस्य नामकर्मण्यधिकारीसिद्धिरस्तु॥

**संकल्पः** – मम अस्य शिशोः बिजगर्भसमुद्भवैनोनि बर्हणार्युरभिवृद्धिद्वारा श्री परमेश्वरप्रीत्यर्थम् नामकरणसंस्काराख्यं कर्म करिष्ये। ततः श्री महागणपतये नमः ''इति पञ्चोपचारैः पूजनमहम् करिष्ये इति संकल्प्य गणेशस्य पञ्चोपचारैः पूजनं कुर्यात् गणानान्त्वा....इति।''

ततः शिष्टाचारात्कांस्यपात्रे तण्डुलान् प्रसार्य तदुपरि सुवर्णशलाकया गणपतिस्वकुलदेवता-भक्तनामलेख्यम्।

ततो मासनाम लेख्यम्।

ततो मासनाम लेख्यम्। ततो ज्योतिः शास्त्रोक्तावकहडाचक्रानुसारेण नक्षत्रनाम लेख्यम्। ततो व्यवहारनाम लेख्यम्। अद्येत्यादि ममास्य शिशोः बह्वायुष्यप्राप्तर्थं नामदेवतापूजनमहं करिष्ये। मनोजूति इति नामदेवतायाः प्रतिष्ठा कार्या। ततः भूर्भवः स्वः नामदेवतायै नमः इति नाममन्त्रेण आवाहनम् आसनं पाद्यम् इति षोडशोपचारैः वा पञ्चोपचारैः संपूजयेत्।

अनया पूजया नामदेवता प्रीयतां न मम। ततः स्वदक्षिणतो मातुरुत्सङ्गस्थस्य शिशोर्दक्षिणकर्णे कथयति।

हे कुमार! त्वं गणपतिभक्तोऽसि। सर्वान्ब्राह्मणान् अभिवादय।

बटुः वदति – अभिवादयामि। आचार्यः आयुष्मान् भव सौम्य। हे कुमार! त्वं कुलदेव्या भक्तोऽसि। सर्वान्ब्राह्मणान् अभिवादय।

बटुः वदति – अभिवादयामि। आचार्यः आयुष्मान् भव सौम्य। हे कुमार! त्वं नक्षत्रनाम्ना अमुकशर्मासि। सर्वान्ब्राह्मणान् अभिवादय।

बटुः वदति – अभिवादयामि।

आचार्यः आयुष्यमान् भव सौम्य। हे कुमार! त्वं व्यवहारनाम्ना अमुकशर्मासि। सर्वान्ब्राह्मणान् अभिवादय।

बटुः वदति – अभिवादयामि। आचार्यः आयुष्मान् भव सौम्य।

ततो विप्राः वेदोसीति मन्त्रेण आशिषं शिशवे दद्युः।

व्वेदोसियेनच्चंदेवव्वेद – देवेभ्योव्वेदोभवस्तेनमह्यं व्वेदोभूयाः॥

मनोजूतिरिति प्रतिष्ठाकार्या। अमुकनाम्ना प्रतिष्ठितं भवतु।

हे कुमार! सर्वान् ब्राह्मणान् अभिवादय। अभिवादयामि। आयुष्मान् भव सौम्य अथैनमभिमृशति। आचार्यः ॐ अश्मा भव परशुर्भव हिरण्यमस्तुतं भव। आत्मा वै पुत्रनामासि स जीव शरदःशतम्।

**संकल्पः** – कृतस्य नामकर्मणः साङ्गतसिद्धयर्थं स्मृत्युक्तान् दशसंख्याकान् ब्राह्मणान् यथाकाले यथासंपन्ने अन्नेनाहं भोजयिष्ये तेन कर्माङ्गदेवता प्रीयतां न मम।

लम्बोदर नमस्तुभ्यं। यथाशक्त्या नामकरणविधेः परिपूर्णता अस्तु।

## शब्दार्थाः

**शरीरम्** तनुः, **मनः** मानसम्, **लम्बोदरः** गणेशः, **बालकः** शिशुः, **अतिक्रमणम्** उल्लंघनम्, **पादः** चरणौ, **निवृत्ति** निवारणम्, **प्रत्यवायः** पापम्॥

## स्वाध्यायः

**1. कोष्ठकप्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा रिक्तस्थानानि पूरयत।**

(1) षोडशसंस्कारे नामकरणसंस्कारः ..........अस्ति। (तृतीयः, पञ्चमः, प्रथमः)

(2) .......... कृत्वा नामकरणं भवति। (मुखदर्शनम्, गुणदर्शनम्, ज्ञानदर्शनम्)

(3) नामकरणं ......... प्रत्ययाधारितं भवति। (कृत्, तद्धितम्, यङ्गन्तम्)

(4) माता शिशोः ......... कथयति। (वामकर्णे, ऊर्ध्वकर्णे, दक्षिणकर्णे)

(5) प्रत्यवायशब्दस्य ........ पर्यायवाची भवति। (प्रत्ययः, पापम्, पर्यायः)

(6) ........ अर्थात् उल्लंघनं भवति। (संक्रमणम्, अतिक्रमणम्, आक्रमणम्)

(7) ब्राह्मणस्य कृते ......... शब्दः प्रयुज्यते। (शर्मा, गुप्ता, वर्मा)

**2. निम्नलिखिप्रश्नानाम् एकवाक्येन उत्तरं लिखत।**

(1) नामकरणं कदा भवति?

(2) वैश्यानां नामान्ते किं भवति?

(3) क्षत्रियाणां नाम किं सूचयति?

(4) 'वर्मा' शब्दः कषां कृते प्रयुज्यते?

(5) स्थाल्यां नामोल्लेखनं कः करोति?

(6) हे कुमार! त्वं गणपतिभक्तोऽपि इति कः वदति?

(7) हिरण्यगर्भः अर्थात् कः?

**3. निम्नलिखित प्रश्नानां सविस्तरम् उत्तरं लिखत।**

(1) वर्णानुसारं ''नाम'' कीदृशं भवेत् इति - लिखत।

(2) बटुं प्रतिं आचार्योपदेशं लिखत।

**4. निम्नलिखित मन्त्राणां पूर्तिः विधेया।**

(1) गणानानचा .......०।

(2) मनोजूतिर्जु ........ ०।

(3) वेदोऽसि ग्येन .........०।

**6. उचितं मेलनं कुरुत।**

| अ | ब |
|---|---|
| (1) ब्राह्मणः | दासः |
| (2) क्षत्रियः | शर्मा |
| (3) वैश्यः | गुप्तः |
| (4) शूद्रः | वर्मा |

**छात्रप्रवृत्तिः**

स्फोरकपत्रे नामकरणसंस्कारे आगतानां प्रत्येकविधीनाम् चित्रनिर्माणं कृत्वा कक्षायां स्थापयन्तु।

**अध्यापकप्रवृत्तिः**

अध्यापकः छात्रेभ्यः अन्यसंस्काराणां प्रारम्भिक परिचयं दास्यति।

**विशेषम् - षोडशसंस्काराणां नामानि**

गर्भधानं पुंसवनं सीमन्तो जातकर्म च।

नामक्रियानिष्क्रमणेऽन्नाशनं वपनं क्रिया॥

कर्णवेधो व्रतादेशो वेदारंभक्रियाविधिः।

केशान्तः स्नानमुद्वाहो विवाहाग्निपरिग्रहः॥

त्रेधाग्निसङ्ग्रश्चेति संस्काराः षोडशः स्मृताः॥

**अपरञ्च** -

कृष्णोऽनन्तोऽच्युतश्चक्री वैकुण्ठोऽथ जनार्दनः।

उपेन्द्रो यज्ञपुरुषो वासुदेवस्तथा हरिः॥

योगीशः पुण्डरीकाक्षो मासनामान्यनुक्रमात्॥

(चैत्रादि - क्रमतो मार्गशीर्षादिक्रमतो वा मासनाम लेख्यम्।)

●

| १४ | # कर्णवेधसंस्कारः |
|---|---|

**प्रस्तावना**

षोडशसंस्काराः मानवान् चतुर्विधपुरुषार्थस्य फलप्राप्तिं बोधयन्ति, तेष्वेकः कर्णवेधसंस्कारः। मनुजानां षोडशसंस्कारेषु कर्णवेधः नवमः संस्कारो विद्यते। तस्य संस्कारस्य विचारणा अत्र प्रस्तूयते।

---

कर्णस्य वेधः कर्णवेधः षष्ठीतत्पुरुषसमासः अस्मिन् पदे विद्यते। कर्णस्य छेदनं कर्णवेधः इति। षोडशसंस्कारेषु अयं संस्कारः विशेषमहत्वं भजते। कर्णवेधसंस्कारे कर्णस्य छेदनं क्रियते। अत्र प्रश्नः – समुद्भवति यत् कर्णवेधः (कर्णच्छेदनम्) किमर्थम्? तत्र चिकित्सकः आचार्यः सुश्रुतः उत्तरति यत् –

**''रक्षाभूषणनिमित्तं बालस्य कर्णौ विध्येते''**



अर्थात्–बालकस्य कर्णवेधस्य उद्देश्यो द्वौ विद्येते – प्रथमोद्देश्यः – बालकस्य रक्षा इति। द्वितीयोद्देश्यः बालकस्य कर्णे आभूषणं भूषयेत् तदर्थमिति। बालकस्य कर्णच्छेदने रक्षा कथं भवति इति प्रश्नः मनसि जायते। कर्णवेधेन बालकशरीरे रोगाः न प्रविशन्ति। महान् चिकित्सकाचार्यः सुश्रुतः, सुश्रुतसंहिता नामकं ग्रन्थम् अरचयत्। अयं ग्रन्थः 'शल्यचिकित्सायाः' (Surgery) वर्तते। तत्रलिखितमस्ति यत् कर्णच्छेदनने **अंगवृद्धिः (हर्निया)** नामकः रोगः न भवति। सम्प्रति तु सर्वे जनाः कर्णवेधकार्यं छेदनं वा कुर्वन्ति परंतु आचार्यः सुश्रुतः लिखति यत् –

**''भिषक वामहस्तेनाकृष्य कर्मदैवकृते छिद्रे आदित्यप्रकाशावभास्विते शनैः शनैः ऋजु विध्येत''**

अर्थात् वैद्य एव वामहस्तेन कर्णम् आकृष्य कर्णे यत्र सूर्यकिरणानि पतितानि स्युः तत् प्रकाशितस्थलम् **दैवकृतनाम्ना** व्यवह्रीयते, तत्रैव कर्णस्य छेदनं स्वीकार्यं भवति। ऋषिः कश्यपोऽपि कर्णवेधसंस्कारः कथं आवश्यकः? इति श्लोकद्वयेन महत्त्वं प्रतिपादितवान्। यथा –

**कदा वेध्यं कथं वेध्यं कुत्र वेध्यं कथं व्यधः।**

**हितोऽहितोऽत्ययः कस्य तत्रांशः किं प्रपत्स्यते॥**

**भावार्थः** – कर्णवेधः कदा कथं करणीयः लाभाऽलाभौ कौ स्तः? अनेन संस्कारेण अज्ञः किं प्राप्नुयात्?

**तस्मात् भिषक् सकुशलः कर्णः विध्येतं विचक्षणः।**

**शिशोः हर्षप्रमत्तस्य धर्मकामार्थ सिद्धये॥**

**भावार्थः** – कुशलो विचक्षणः वैद्यः एव कर्णवेधं कुर्यात् कारणं अस्य संस्कारस्य फलं – धर्मः, अर्थः, कामः, मोक्ष इति चतुर्विधपुरुषार्थस्य फलप्राप्तिः। अतः कश्यपः षोडशसंस्कारेषु कर्णवेधस्य विशिष्ट महत्त्वं मनुते। ''व्यासस्मृतौ'' अपि एतादृशं मतं प्राप्यते – अस्य जातकस्य चूडाकरणंसंस्कारः अभवत् तस्य कर्णवेधसंस्कारः करणीयः –

**कृतचूडे च बाले च कर्णवेधो विधीयते**

(व्यासस्मृतिः - 2/19)

महर्षि गर्गः अपि भणति यत्

**''कर्णवेधं प्रशंसन्ति पुष्ट्यायुः श्रीविवृद्धये''**

अर्थात् - दीर्घायु एवं श्रेयो वृद्ध्यर्थं शास्त्रेषु मुनयः कर्णवधसंस्कारं प्रशंसन्ति। कर्णवेधसंस्कारस्तु कन्याया, पुत्रस्य च भवति।

सुश्रुतसंहितायाम् लिखितमस्ति -

**रक्षाभूषणनिमित्तं बालस्य कर्णौ विध्येते पूर्वं दक्षिणं कुमारस्य वामं कुमार्याः ततः पिचुवर्तिं प्रवेशयेत्**

(सुश्रुतासंहिता सूत्र 26/3)

अर्थात् - चिकित्सकशास्त्राचार्यः सुश्रुतः पुत्रस्य प्रथमं दक्षिणं कर्णं, कन्यायाः वामं कर्णं छिद्यात् इति। तदनन्तरं सुकागति अस्त्रं कर्णे प्रवेशं कुर्यात् इति सः अबोधयत् कर्णवेधसंस्कारस्य महत्त्वतां बोधयता ''कुमारतन्त्रे'' चक्रपाणिना कर्णे कुण्डलधारणेन मुखस्य शोभा एवं बालारिष्टियोगात् बालस्य रक्षा भवति, अतः संस्कारोऽयम् अतीव महत्त्वपूर्णः फलप्रदश्चास्ति -

**कर्णव्यधे कृतो बालो न ग्रहैरभिभूयते।**
**भूष्यतेऽस्य मुखं तस्मात् कार्यस्तत् कर्णयोर्व्यधः॥**

अर्थात् - कर्णवेधकृतं बालम् अनिष्टग्रहाः न पीडयन्ति कर्णच्छेदनकर्मणा तस्य मुखस्य शोभा अपि वर्धते अतः संस्कारोऽयम् आवश्यकः इति।

**कर्णवेधसंस्कार-प्रयोगः**

प्रातः कालेशुभमुहुर्तादि दृष्ट्वा पितरौ बालकं बालिकां वा नीत्वा पूर्वाभिमुखं उपविश्य पूजायाः आरंभं करोति। बालकं बालिकां वा स्वाङ्के निधाय - एवं हस्ते जलं गृहीत्वा

**संकल्पः**

ॐ विष्णुर्विष्णुर्विष्णु.... कर्णवेधसंस्कारकर्म अहं करिष्ये....(विधि-अनुसारं सर्वाणि पूजनानि विधातव्यानि)

**कर्णयोः अभिमन्त्रण विधिः**

**दक्षिणकर्णः**

**भद्रं कर्णेभिः शणुयाम देवा भद्रं पश्येमाक्षभिर्यत्राः।**
**स्थिरैरङ्गैस्तुष्टुवाꣳ सस्तनू भिर्व्यशेमहिदेवहितं यदायुः॥**

**( यजु. 25/21 )**

**भावार्थः** - हे देवाः! वयं कर्णैः भद्रवचनानि शृणुयाम, हे जयजनीयदेवः। नयनैः वयं कल्याणयुक्तमेव पश्येम, स्थिरैः, अङ्गैः सर्वदेवान् स्तुवन्तः वयं स्वशरीरैः देवदत्तम् आयुः प्राप्नुयाम।

अनेन मन्त्रेण पिता बालकस्य दक्षिणं कर्णं जलेन आर्द्रं करोति।

**वामकर्णः**

ॐ **व्वक्षन्तीवेदागनीगन्ति कर्णप्रियꣳ सखायं परिषस्वजाना।**
**योषव शिङ्क्ते वितताधि धन्वञ्ज्या इय समने पारयन्ती॥** **( यजु. 29/40 )**

**भावार्थः** – संग्रामे विजयप्रदात्री प्रत्यञ्चा बाणेन सह अव्यक्तध्वनिरूपेण मिलति। सा योद्धुः कर्णे किमपि वक्तुम् इच्छति इति प्रतीति जायते।

अनेन मन्त्रेण पिता बालकस्य वामकर्णं जलेन आर्द्रं करोति।

**शब्दार्थाः**

**भिषक** वैद्यः, **विचक्षणः** विद्वान् पण्डितः, **भद्रम्** मङ्गलम्, **चिकित्सा** रुक् प्रतिक्रिया, **मुखं** आननम्, **कर्णः** शब्दग्रहः श्रोत्रम्, **आचार्यः** मन्त्रव्याख्याकृत्।

**स्वाध्यायः**

**1. कोष्ठकप्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा रिक्तस्थानानि पूरयत।**

(1) कर्णवेधसंस्कारः ......... संस्कारः अस्ति।(दशमः/सप्तमः/नवमः)

(2) कर्णवेधेन बालकशरीरे ......... न प्रविशन्ति। (शक्तयः/रोगाः/गुणाः)

(3) सुश्रुतसंहिताया कर्ता ......... वर्तते। (सुश्रुतः/पाणिनीः/वैद्यराजः)

(4) चूडाकरणसंस्कारान्ते ......... संस्कारः करणीय। (नामकरण/कर्णवेध/निष्क्रमण)

(5) कर्णे कुण्डलधारणेन ......... शोभा वर्धते। (मुखस्य/नासिकायाः/मस्तिष्कस्य)

(6) बालकं नीत्वा मातापितरौ ......... उपविशतः। (पूर्वाभिमुखं/उत्तराभिमुखं/दक्षिणाभिमुखं)

(7) सर्वप्रथमं बालकस्य ......... कर्णं आर्द्रं क्रियते। (दक्षिणं/वामं/उभौ)

**2. निम्नलिखितप्रश्नानाम् एकवाक्येन उत्तरं लिखत।**

(1) नवमसंस्कारः केन नाम्ना ज्ञायते?

(2) सुश्रुतसंहिता कस्य चिकित्सायाः ग्रन्थः?

(3) कर्णच्छेदेन कः रोग न भवति?

(4) कर्णवेधसंस्कारेण कति पुरुषार्थस्य फलप्राप्ति?

(5) "कृतचूडे च बाले च कर्णवेधो विधीयते।" इतिकुत्र लिखितम्?

(6) कर्णवेधसंस्कारस्य द्वौ उद्देश्यौ वर्तते इति वाक्यं कः कथयति?

(7) कीदृशः वैद्यः कर्णवेधं कुर्यात्?

**3. निम्नलिखित प्रश्नानाम् सविस्तरम् उत्तरं लिखत।**

(1) रक्षाभूषणनिमित्तं बालस्य कर्णौ विध्यते इति वाक्यं विवेचयत।

(2) कर्णयोः अभिमन्त्रणविधिः लिख्यताम्।

**4. निम्नलिखित मन्त्राणां पूर्तिं कृत्वा अर्थं लिखत।**

(1) ॐ भद्रं कर्णेभिः ........०।

(2) ॐ वक्ष्यन्ती वेदा ........ ०।

(3) कदा वेद्यं .........०।

(4) तस्मात् भिषक .........०।

**5. उचितं मेलनं कुरुत।**

| | **अ** | **ब** |
|---|---|---|
| (1) | सुश्रुतः | चतुर्विद्याः |
| (2) | गर्गः | रक्षाभूषणनिमित्तं बालस्य कर्णौ विध्येत |
| (3) | व्यासस्मृतिः | कृतचूडे च बाले...। |
| (4) | वैद्यः | पुष्ट्यायुः स्त्रीविवृद्धये |
| (5) | पुरुषार्थाः | कुशलः |

**छात्रप्रवृत्तिः**

स्फोरकपत्रे (चार्ट-पेपर-मध्ये) सुश्रुतसंहितायाः परिचयः, वैद्यलक्षणम्, पुरुषार्थानां नामानि-लिखन्तु।

**अध्यापकप्रवृत्तिः**

सुश्रुतसंहितादि ग्रन्थानां साक्षात् परिचयं विशेषाध्ययनं च छात्रेभ्यः कारयेत्। आवश्यकतां च बोधयेत्।

●

# १५ गृहनिष्क्रमणसंस्कारः

**प्रस्तावना**

वैदिकसंस्कृतौ संस्काराः मानवानां नवनिर्माणं कुर्वन्ति। संस्कारैः संस्कृतेः रक्षा भवति। संस्काराणां विविधानि उद्देश्यानिः सन्ति तद्यथा उपनयनसंस्कारस्य उद्देश्यः आध्यात्मिकः एवं सांस्कृतिकश्च वर्तते ततः वेदारम्भस्य मार्गः उद्घाटितो भवति मनोवैज्ञानिकमहत्वम् अपि अस्ति। इत्थं सर्वेषां संस्काराणां महत्वं विद्यते।

भारतीय संस्कृतिः संस्काराणां मूल्यानां आधारेण स्थिता वर्तते यथा श्वासस्य आवश्यकता जीवनजीवनाय भवति तथा मानवमूल्यानां रक्षणाय संस्काराणां आवश्यकता वर्तते षोडशसंस्कारेषु अत्र पठिष्यामः।

अत्र पाठेऽस्मिन् वयं **गृह-निष्क्रमणसंस्कारविषये** पठिष्यामः।

---



षष्ठः संस्कारः निष्क्रमणसंस्कारः इति कथ्यते। अस्मिन् संस्कारे सर्वप्रथमवारं बालकस्य गृहाद् बहिः निष्क्रमणक्रिया भवति। तस्य जन्मनः समयात् आरभ्य चत्वारः मासाः यदा संपूर्णाः भवन्ति। तदायं संस्कारो भवति। अतः अस्मिन् समये शास्त्रानुसारं निष्क्रमणं बालकस्य उचितम् अस्ति। निष्क्रमणसंस्कारेण सद्गुणानां आधानम् एवं जातकः दीर्घायुः सुस्वास्थ्यसम्पन्नः च भवति।

उक्तं च... **निष्क्रमणादायुषो वृद्धिरप्यादृष्टा मनीषिभिः।**

बालकस्य जन्मनान्तरं कानिचित् दिनानि गृहे उषित्वा ततः बालकस्य गृहनिष्क्रमणम्भवति। बालकः दीर्घायुः, तेजस्वितां च प्राप्नुयात् तदर्थं सूर्यनारायणस्य प्रकाशे पिता बालकं नयति। जन्मनः समये बालकस्य गृहाद् बहिर्गमनम् निषेधं कृतमस्ति कारणं यत् जन्मनः प्रारम्भिके काले सूर्यप्रकाशः दुष्प्रभावकारको भवति। अतः कानिचित् दिवसानि बालकेन गृहे एव स्थातव्यानीति।

निष्क्रमण संस्कारस्य शुभसमयः

**नक्षत्रेषु** - अश्विनी, मृगशिरा, पुष्य, पुनर्वसु, हस्त, अनुराधा, घनिष्ठा, श्रवण, रेवती, एतानि नक्षत्राणि शुभानि सन्ति।

**तिथयः** - द्वितीया, पञ्चमी, सप्तमी, दशमी, एकादशी, त्रयोदशी एते उत्तमाः तिथयः सन्ति।

**वाराः** - रविः सोमः बुधः शुक्रः एतेषु एकं वारं चयनीयं इति।

निष्क्रमणसंस्कारादौ आचार्यः आचमनं, प्राणायामं कर्मणि अधिकारं च यजमानं कारयित्वा संकल्पं विदधाति।

**संकल्पः**

अद्येत्यादि...०ममसुतस्यबीजगर्भसमुद्भवैनोनिबर्हणायुः श्रीवृद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंगृहनिष्क्रमणसंस्काराख्यंकर्माहंकरिष्ये। तदङ्गत्वेन गणपतिपूजनं करिष्ये। ततः पंचोपचारैः महागणपतेः पूजनं करणीयमिति।

**गणपतिमन्त्रः -**

**ॐ गणानान्त्वागणपतिँहवामहेप्प्रियाणान्त्वाप्रियतिँहवामहेनिधीनान्त्वानिधिपतिँहवामहेव्वसोमम। आहमजानिगर्ब्भधमात्त्वमजासिगर्ब्भधम्॥**

**भावार्थः** - गणेषुश्रेष्ठं गणपतिं याचामहे प्रियेषु श्रेष्ठं प्रियपतिं याचामहे। निधिषुत्वानिधिपतिं याचामहे। हे वसो ! त्वमेव अस्माकं स्वामी भव। तव गर्भधारकं तेजः आकृष्य अहं मयि धारयामि। त्वमपिगर्भधारकं तेजः आकृष्य मयि धारय।

यस्मिन् दिने निष्क्रमणसंस्कारः क्रियते तस्मिन् दिने प्रातः सूर्योदयकाले जलपूरिते ताम्रपात्रे गुडकंकुमरक्तपुष्पमादि सम्मिश्रित्यसूर्यदेवतायै अर्घ्यः दातव्यः पिता समातृगृहीतमलङ्कृतकुमारं सवाद्यघोषं गृहाद् बहिरानीयसूर्यमुदिक्षयति। तत्र मन्त्रपठनम्।

**मन्त्रः** - **तच्चक्षुर्देवहितं पुरस्तातच्छुक्रमुच्चरत्॥ पश्येमशरदः शतन्जीवेमशरदः शतँ श्रृणुयाम शरदः शतं प्रब्रवामशरदः शतमदीनाः स्यामशरदः शतम्भूयश्चशरदः शतात्॥**

**भावार्थः** - देवैः निहितः सः सर्वचक्षुः सूर्यः पूर्वात् उदेति। तं वयं शतवर्षं पश्येम। शतंवर्षम् यावत् जीवेत्। शतवर्षं यावत् श्रुणुयात्। शतवर्षं यावत् कथयामः। शतवर्षं यावत् अदीनाः भूयाम। अग्रे गत्वा अपि पुनः पुनः शतवर्षाधिकमपि वयं अदीनाः भूयाम।

भूर्भुवः स्वः कलिङ्ग देशोद्भव काश्यपसगोत्र भो सूर्य! इहागच्छ इह तिष्ठ ओंम् सूर्याय नमः सूर्यम् आवाहयामि स्थापयामि। सूर्यतेजसि बालकः तेजस्वी, कर्मनिष्ठः नियमपालकः भवेत्, तद्धेतवे सूर्यदर्शनम् क्रियते। दर्शनेनसूर्यनारायणः आरोग्यकारकः शारीरिकमानसिकवृद्धिदायकंभवति ततः शास्त्रानुसारं निष्क्रमणसंस्कारे संस्कृतभोजनात् गवये, पितृभ्यः, सूर्याय च भोजनस्थालिका पृथक् दातव्या तदनन्तरम् ब्राह्मणाः भोजनं कुर्वन्ति। यथा उक्तं

**संकल्पः -**

कृतस्य निष्क्रमणता सिद्ध्यर्थं स्मृत्युक्तान् दशसंख्याकान् ब्राह्मणान् यथाकाले यथा सम्पन्नेनान्नेनाहं भोजयिष्येतेन कर्मांगदेवता प्रीयतां न मम।

**प्रार्थना -**

**लम्बोदर नमस्तुभ्यं सततं मोदकप्रिय।**
**निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा।**

यथाशक्ति निष्क्रमणविधेः परिपूर्णतास्तु।

निष्क्रमणसंस्कारान्ते गणपतेः प्रार्थनां विधाय सर्वैः प्रसादग्रहणं करणीयं ततः बालकाय आशीर्वादप्रदानं करणीयम्।

**शब्दार्थाः**

**सुतस्य** पुत्रस्य, **मनीषिभिः** पण्डितैः, **पश्येम** दृश्येम, **सूर्यः** भास्करः, **सततं** अनवरतं, **तेजसि** प्रकाशे, **प्रातः** प्रभातम्, **गणः** समूहः॥

**स्वाध्यायः**

**1. कोष्ठकप्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा रिक्तस्थानानि पूरयत।**

(1) षोडशसंस्कारे निष्क्रमणसंस्कारः ......... अस्ति।(षष्ठः/सप्तमः/पञ्चमः)

(2) बालकस्य निष्क्रमणसंस्कारः ......... मासे भवति। (चतुर्थे/द्वितीये/तृतीये)

(3) संस्कारः अयं ......... वृद्धिं करोति। (आयुः/ज्ञान/कीर्तिः)

(4) अनेन संस्कारेण ......... आधानम् भवति। (सद्गुणानां/दुर्गुणानां/दोषाणां)

(5) गणानान्त्वा .................. मन्त्रः अस्ति। (गणपतेः/सूर्यस्य/शिवस्य)

(6) संस्काराः एव ........ योग्यान् कुर्वन्ति। (मानवान्/पदार्थान्/बालकान्)

(7) संस्कारशब्दे ......... उपसर्गः अस्ति। (सम्/स/कृ)

**2. निम्नलिखिप्रश्नानां एकवाक्येन उत्तरं लिखत।**

(1) निष्क्रमणादायुषोवृद्धिः इति कैः उक्तं ?

(2) सूर्यस्य कः वर्णः ?

(3) सूर्यः कस्मिन् गोत्रे उत्पन्नः ?

(4) संस्कारशब्दे कः धातुः ?

(5) कस्मिन् काले बालकाय सूर्यप्रकाशः दुष्प्रभावकारको भवति ?

(6) गणेषु कः श्रेष्ठः ?

(7) प्रातः काले सूर्यदेवतायै किं दातव्यम् ?

**3. निम्नलिखित प्रश्नानां सविस्तरम् उत्तरं लिखत।**

(1) निष्क्रमणसंस्कारस्य उत्तमानि नक्षत्राणि लिखत।

(2) गणानात्वा...० मन्त्रं सार्थं स्पष्टयत।

(3) तच्चक्षुर्देव...० मन्त्रं सार्थ लिखत।

**4. विलोमशब्दान् लिखत।**

| | | |
|---|---|---|
| (1) मम | (2) सूर्यः | (3) दीर्घायुः |
| (4) जन्म | (5) संतोषः | |

**छात्रप्रवृत्तिः**

स्फोरकपत्रे नामकरणसंस्कारे आगतानां प्रत्येकविधीनां चित्रनिर्माणं कृत्वा कक्षायां स्थापयन्तु।

**अध्यापकप्रवृत्तिः**

शिक्षकः प्रत्यक्षस्वरूपेण निष्क्रमणसंस्कारस्य सूर्यदर्शनविधेः मन्त्रज्ञानम् दास्यति।

●

# १६ अन्नप्राशनसंस्कारः

**प्रस्तावना**

अस्माकं भारतीयसंस्कृतौ संस्काराणाम् अतीव महत्त्वं वर्तते। संस्कारैः मनुष्यः मनुष्यत्वं प्राप्नोति। बालकानाम् उन्नतं विकसितं च जीवननिर्माणार्थं संस्काराणाम् आवश्यकता वर्तते एव। अतः षोडशसंस्कारेष्वत्र **अन्नप्राशनसंस्कारविषये** पठिष्यामः।

---



अन्नप्राशनसंस्कारः षोडशसंस्कारेषु सप्तमः संस्कारः वर्तते। जातकस्य षण्मासे जाते सति संस्करोऽयं कर्तुं शक्यते। जन्मतः षट् सप्त मासानन्तरं जातकस्य पाचकरसाः परिपक्वा भवन्ति। तदा अन्नप्राशनसंस्कारः सर्वप्रथमं भवति। जातकस्य आन्तरिक विकासेन सह बाह्यविकासोऽपि भवतु इति अपेक्षायां अन्नं आवश्यकं भवति अतः जातकस्य अन्नप्राशनं ईश्वरसन्निधौ विधिपूर्वकं भवति। कारणम् ''अन्नं ब्रह्म'' ''रसो वै सः'' भगवान अनेन षड्रसान् प्रकटीकरोति। बालकस्य अन्नप्राशनसंस्कारः षष्ठे मासैव भवति स एव उत्तमः समयः वर्तते। पारस्कर-गृह्यसूत्रे लिखितमस्ति यत्

**षष्ठे मासि अन्नप्राशनम् ( पा.गृ. 1.26.2. )**

अर्थात् षष्ठे मासे अन्नप्राशनसंस्कारः विधातव्यः इति।

आश्वलायन गृह्यसूत्रे (**2.26.5.**) लिखितमस्ति यत् -

''**दधिमधुघृतमिश्रितं अन्नं प्राशयेत्।**''

अर्थात् दधि, मधु, घृतं, संमिश्रित्य बालकं आस्वादयेत् इति।

यदा बालकस्य जन्म भवति तदा लपने (मुखे) दन्ताः न भवन्ति। अतः ईश्वरानुग्रहेण बालकः स्तनपानं कृत्वा सुस्वस्थो भवति। मातुः दुग्धे पोषकतत्वं भवति अतः बालकः दुग्धपानं कृत्वा स्वास्थ्यसम्पन्नो विकसितः च भवति। एषा दुग्धपानक्रिया पञ्चमासं पूर्णं भवेत् तावदेव कर्तव्या। ततः षष्ठे मासे बालकमुखे दन्ताः आगच्छन्ति अतः बालकस्य अन्नप्राशनसंस्कारः कर्तव्यः। अस्य वैज्ञानिकं महत्त्वं अपि अस्ति। स्वाभाविकं पुत्रं पुत्रीं च माता स्निह्यति पञ्चमासानन्तरमपि बालकाय स्तनपानं कारयति तेन कारणेन मातापि क्षीणा अस्वस्था च भवति कारणं अधिकस्तनपानकारणेन मातरि अशक्तिः आगच्छति, अतः बालकस्य षष्ठे मासे अन्नप्राशनं भवति। अन्नप्राशनेन बालकस्य अन्तः शरीरे विद्यमाना मलिनता दूरी भूत्वा पवित्रतायाः आरोपणं क्रियते।

उक्तं च स्मृतिग्रंथे - ''**अन्नप्राशनान्मातृगर्भमलाशादपि शुद्ध्यति**''।

### अन्नप्राशनसंस्कार-प्रयोगः

यजमानाय आचमनं, प्राणायामं, दीपादिपूजनं आचार्यः कारयित्वा संकल्पं करोति।

(संकल्पं कारयति)

संकल्पः ॐ विष्णुर्विष्णुर्विष्णुः .......... ममास्य शिशोर्मातृगर्भमलप्राशनविशुध्यर्थं अन्नाद्यब्रह्मवर्चस्तेजायुर्बलेन्द्रियलक्षणफलसिद्धिपूर्वक-बीजगर्भसमुद्भवैःनोतिबर्हणद्वारा श्रीपरमेश्वरप्रीत्यर्थम् अन्नप्राशनाख्यं कर्म करिष्ये।

तदङ्गत्वेन स्वस्तिपुण्याहवाचनं मातृकापूजनं वसोर्धारापूजनमायुष्यमन्त्रजपं साङ्कल्पिकेन विधिना नान्दिश्राद्धं च करिष्ये। तत्रादौ निर्विघ्नतासिद्ध्यर्थं गणेशाम्बिकयोः पूजनं करिष्ये।

ततः गणेशाम्बिकयोः पूजनं स्वस्तिपुण्याहवाचनं ऋत्विग् वरणं, पञ्चभूसंस्कारपूर्वकं शुचिनाम्नः वैश्वानरपूजनं कर्तव्यम्। पूजनानि कर्तव्यानि।

ततः बालकस्य आरोग्यविवृद्ध्यर्थं पायसाहुतिक्रमः विद्यते पायसाहुतेः प्राक् तण्डुलानां प्रक्षालनं शुद्धजलेन क्रियते। तण्डुलाः शिशवे आरोग्यप्रदायकाः स्युः तादृशः भावः निहितोऽस्ति। तण्डुलानां प्रक्षालनं कृत्वा, ततः अग्नौ सिद्धं कर्तव्यं ततः तेन सह घृतमधुदधि-इत्यादीनां मिश्रणं करणीयम्।

तत्समये इमे मन्त्राः उच्चारणीयाः

ॐ प्राणाय त्वा जुष्टं प्रोक्षामि।

ॐ अपानाय त्वा जुष्टं प्रोक्षामि।

ॐ चक्षुषे त्वा जुष्टं प्रोक्षामि।

ॐ श्रोत्राय त्वा जुष्टं प्रोक्षामि।

ॐ अग्नये त्वा जुष्टं प्रोक्षामि।

उपर्युक्त मन्त्राणां अर्थः इत्थं वर्तते - तण्डुलानां प्रक्षालनं ततः निर्माणं क्रियते तदा इमं तण्डुलं प्राणापानचक्षुश्रोत्राग्निनाम् शिशवे प्रीति-प्राप्त्यर्थं प्रोक्षणं करोमि इति भावयेत्। तत्पश्चात् आहुतिः दीयते। आहुतिकाले ''प्रोक्षामि'' इति शब्दस्थाने ''निर्वपामि'' शब्दस्य उच्चारणं क्रियते।

**चरुहोमः**

चरुमध्ये घृतस्य मिश्रणं कृत्वा निम्नलिखितमन्त्रैः एकैका आहुतिः दीयते।

ॐ प्राणेनान्नमशीय स्वाहा। इदं प्राणाय न मम।

ॐ अपानेन गन्धानशीय स्वाहा। इदमपानाय न मम।

ॐ चक्षुषा रुपाण्यशीय स्वाहा। इदं चक्षुषे न मम।

ॐ श्रोत्रेण यशोऽयशीय स्वाहा। इदं श्रोत्राय न मम।

ततश्च भूरादि नवाहुतयः स्विष्टकृत् आहुतिः।

संस्रवप्राशनं, मार्जनविधिः, पूर्णपात्रदानं, प्रणिताविमोकः इत्यादि कर्माणि करणीयानि। अन्नप्राशनसंस्कारे विशेषाहुतौ पायसद्रव्यस्य द्वे आहुती दीयेते तेन बालकः मधुरवाग्मी स्फुटको भवेत्।

**मन्त्रः** – **ॐ देवींवाचमजनयन्तदेवास्तांविश्वरूपाःपशवोवदन्ति।**

**सा नो मन्द्रेपमूर्जंदुहानाधेनुर्वागस्मानुप सुष्टुतैतु स्वाहा॥**

**भावार्थः** – अन्नप्राशनसंस्कारकाले बालकः मधुरावाणीं, सरलां, सुगमां वाचां वदेत् एवञ्च बालकः सहजतया वाचं ब्रूयात् एतादृशीं वाचं उच्चारयेत् बालकः इति मन्त्रे भावः निहितः।

**मन्त्रः** – **ॐ व्वाजोनोऽअद्य प्रसुवातिदानंवाजो देर्वांऽऋतुभिःकल्पयाति।**

**वाजोहिमासर्ववीरंजजान विश्वाऽआशा वाजपतिर्जयेँ स्वाहा॥ ( यजुर्वेद 28/33 )**

**भावार्थः** – अन्नप्राशनकाले गृहस्थः जनः कामयति यत् बालकः अन्ननिधिर्धार्यमाणो भूयात्। आवश्यकेभ्यः जनेभ्यः अन्नं वितरेत्। एवं बालकः अजयो भूयात् इति। ततः कटुक्षारतिक्तकषायमधुराम्लानि –

यज्ञकार्ये संपन्ने जाते सति बालकाय अन्नप्राशनं करणीयं भवति। चत्वारः भोज्यपदार्थाः सन्ति तद्यथा–भोज्यं, लेह्यं, चोष्यं एवञ्च पेयं इति।

एतादृशाणां सर्वप्रकाराणां भोज्यरसानां घृतमधुभ्यां मिश्रणं विधाय एकस्मिन् पात्रे नेतव्यं ततः माता शिशुं स्वाङ्के निधाय सुवर्णचमसेन अन्नप्राशनं ॐ हत इति मन्त्रेण। कारयति विदुषाम् एतादृशं मतमस्ति यत् कन्यायाः अन्नप्राशनसंस्कारविधौ मन्त्रान्नोच्चारणीयाः।

ततः कुमारभूमौ उपवेश्यतदग्रे पुस्तकशस्त्र हिरण्यवस्त्रादिशिल्यानिविन्यस्य जीविकापरीक्षा कुर्यात्।

अस्माकं पुराणेषु, वेदेषु चापि अन्नस्य महत्वं विद्यते।

श्री भगवद् गीतायां उक्तं–**अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः।**

**अर्थात्** – अन्नेनैव मनुष्याणां जीवनं शक्यमस्ति। पर्जन्यप्रभावादेव अन्नं उत्पन्नं भवतीति। अनेन संस्कारेण बालके शारीरिकगुणानां, मानसिकगुणानां विकासो जायते अतः संस्कारस्य वैशिष्ट्यं वर्तते।

**संकल्पः** – अनेन कृतस्य अन्नप्राशनाख्यस्य कर्मणः सांगतासिद्ध्यर्थं ब्राह्मणान् भोजयिष्ये तेने कर्मांगदेवता प्रीयतांनमम॥

## शब्दार्थाः

**वाचम्** भाषां, गिराम्, **दन्ताः** रदनाः, दशनाः **बालकः** शिशु, अर्भकः **गर्भः** भ्रूणः **धेनु** नवप्रसूतिका गौः **सुवर्णं** हिरण्यम्, **पर्जन्यः** मेघः।

## स्वाध्यायः

**1. कोष्ठकप्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा रिक्तस्थानानि पूरयत।**

(1) अन्नप्राशनसंस्कारः .......... संस्कारः अस्ति।(पञ्चमः/सप्तमः/नवमः)

(2) अन्नप्राशनसंस्कारः .......... मासे भवति। (षष्ठे/सप्तमे/नवमे)

(3) बालकस्य जन्मसमये .......... न भवन्ति। (जिह्वा/दन्ताः)

(4) अन्नं ..........। (शिवः/विष्णुः/ब्रह्म)

(5) भगवान् अन्नेन .......... रसान् प्रकटी करोति। (पञ्च/षट्/ सप्त)

(6) अन्नाद् ......... भवन्ति। (प्राणिनः/जन्तवः/भूतानि)

(7) माता शिशुं .......... नयति। (स्वहस्ते/स्वाङ्के, हृदये)

**2. निम्नलिखितप्रश्नानाम् एकवाक्येन उत्तरं लिखत।**

(1) सप्तमसंस्कारः को वर्तते ?

(2) कति मासानन्तरं जातकस्य पाचकरसाः परिपक्वाः भवन्ति ?

(3) ''षष्ठे मासे अन्नप्राशनमिति'' कुत्र लिखितमस्ति ?

(4) अन्नप्राशनेन बालकस्य अन्तः शरीरे का दूरी भवति ?

(5) मातुः दुग्धे किं भवति ?

(6) बालकः कीदृशीं वाचां वदेत् ?

(7) चरुमध्ये कस्य मिश्रणं भवति ?

**3. निम्नलिखित प्रश्नानां सविस्तरम् उत्तरं लिखत।**

(1) चरुहोमः सविस्तरं विवेचयत।

(2) अन्नप्राशनसंस्कारस्य वैज्ञानिक महत्त्वं चर्चयत।

(3) अन्नप्राशनसंस्कारे विशेषाहुतिकर्मणः वर्णनं कुरुत।

**4. निम्नलिखित मन्त्राणां पूर्तिं कृत्वा भावार्थं लिखत।**

(1) ॐ देवीं वाचमजनयन्त देव.........।

(2) ॐ व्वाजोनोऽअद्य .........।

(3) ॐ प्राणाय त्वा.........।

(4) ॐ अपानाय त्वा.........।

(5) ॐ श्रोत्राय त्वा.........।

**5. निम्नलिखित शब्दानां विभक्तिं वचनं च लिखत।**

(1) दन्ताः (2) मलिनता (3) पवित्रतायाः

(4) साङ्कल्पिकेन (5) संपन्ने

**छात्रप्रवृत्तिः**

स्फोरकपत्रे (चार्ट-पेपर-मध्ये) अन्नप्राशनसंस्कारविधेः क्रमवर्णनं लिखन्तु।

**अध्यापकप्रवृत्तिः**

शिक्षकेन अन्नप्राशनसंस्कारे अन्नस्य महत्वं छात्रेभ्यः बोधनीयम्। अन्नस्य महत्त्वं विषये विविधग्रन्थानां संदर्भं नीत्वा छात्रेभ्यः अन्नविषयकाः सूक्तयः लिखित्वा बोध्याः।

●

# १७ षट्पिण्डीकरणम्

**प्रस्तावना**

षट्-पिण्डीकरणम् अर्थात् षण्णां पिण्डानां करणीयाः मरणोत्तरविधयः क्रियाः वा। षट्-पिण्डीकरणं मनुष्यमृत्योः पश्चात् करणीया अन्त्येष्टिक्रियाया अङ्गभूता एका क्रिया अस्ति। षट्-पिण्डी नाम यत्र शवस्थापनं भवति ततः आरभ्य अन्तिमसंस्कारे शरीरस्य दाहः भवति तावत् पर्यन्तं पिण्डानां पूजनपूर्वकं त्यागः।

षट्-पिण्डी मृतकमनुष्यस्य तिर्यग्योनिनिवृत्तये भवति। एवं च

अग्निदाहे तिर्यग्योनीनां (भूतप्रेतपिशाचराक्षसयक्षडाकिनीशाकिनीवैतालादिनां) जीवः तस्य मृतदेहस्य अग्निदाहे हानिं न कुर्यात् तथा तस्मिन् शरीरे प्रवेशं न कुर्यात्, तदर्थं शरीरस्य दाहात् पूर्वं त्रयः पिण्डाः एवं त्रयः पिण्डाः श्मशानिक-क्रियायां पूजनपूर्वकं दीयते।

यत्र षट्-पिण्डी करणं न भवति तत्र मृतकः तिर्यक्योनिं प्राप्नोति। गरुडपुराणस्य दशमे अध्याये मृत्योः पश्चात् विधातव्यानि कर्माणि उल्लिखितानि सन्ति। तत्र षट्-पिण्डीसहितानि प्रदत्तानि सन्ति। तत्र षट्-पिण्डीकरणस्य बहुमहत्त्वं प्रतिपादितम् अस्ति।

**देहावसाने कर्तव्यं, तिर्यग्योनिनिवृत्तये।**

**षट्-पिण्डानां प्रदानेन, स्वर्लोकत्वं च गच्छति॥**

---

**आत्मशुद्धिः -**



कस्यापि मृतकस्य उत्तरक्रियाः यस्य हस्तेन भविता तेन मनुष्येण सर्वप्रथमम् आत्मशुद्धिः कर्तव्या यथा संकल्पः-

अत्राद्य महामाङ्गल्ये फलप्रदमासोत्तमे मासे .......... मासे .......... पक्षे .......... तिथौ .......... वासरे .......... गोत्रस्य .......... नाम्नःप्रेतस्य उत्तरक्रिया-अधिकार-प्राप्त्यर्थं यथाशक्ति गोदानं सूतकान्ते करिष्ये।

(रिक्तस्थानेषु यथा मासपक्षतिथिवारसादीनां तथा मृतकस्य गोत्रनाम ग्राह्यम्।)

एवं संकल्पं कृत्वा सूतकान्ते गौदानं करणीयम् वा तन्निमित्तिकं द्रव्यं दातव्यम्।

**अथ षट्-पिण्डी विधानम्**

अत्राद्य महामाङ्गल्ये फलप्रदमासोत्तमे मासे .......... मासे .......... पक्षे .......... तिथौ .......... वासरे .......... गोत्रस्य .......... नाम्नः प्रेतस्य मुक्त्यर्थम् उत्तमलोक-प्राप्त्यर्थं **मृतस्थाने शव नाम पिण्डदानम्** अहं करिष्ये।

संकल्पं कृत्वा पिण्डनिर्माणाय अक्षतचूर्णं वा यवचूर्णं गृहीत्वा जलेन प्रोक्षयेत् पवित्रं करणीयम्। पिण्डनिर्माणं कर्तव्यम्। यत्र पिण्डस्थापनं कर्तव्यं तत्र पितृतीर्थेन जल प्रोक्षणम्। दक्षिणे दर्भमुखं स्यात् तथा उत्तरे मूलं भवेत् तया रीत्या दर्भं स्थापयेत्। दर्भोपरि-षड् -पिण्डस्थापनम्। सर्वं कर्म अपसव्येन भविष्यति।

## षट्-पिण्डपूजनम्

**प्रथमपिण्डः (शवपिण्डः)**

ॐ अद्येत्यादि० .......... गोत्रस्य ......... प्रेतस्य प्रेतत्वमुक्ति प्राप्त्यर्थम् उत्तमलोकप्राप्त्यर्थं तथा भूमि तुष्ट्यर्थं **मृतस्थाने शवनाम** पिण्ड दानं करिष्ये। .......... गोत्रस्य ......... प्रेतस्य प्रेतत्वमुक्त्यर्थं शवनाम एषः पिण्डः मदत्तंस्तवोपतिष्ठताम्। एवं प्रतिपिण्डे कर्तव्यम्।

**पूजनम् :**

- पिण्डे प्रत्यवनेजनम् । – जलप्रोक्षणम्।
- पिण्डे ऊर्णसूत्रम् । – ऊर्णसूत्रं स्थापयेत्।
- पिण्डे उशिरचन्दनम्। – चन्दनं कुर्यात्।
- पिण्डे भृङ्गराजपत्रम् । – भृङ्गराजपत्रार्पणम्।
- पिण्डे भृङ्गराजपुष्पम् । – भृङ्गराजपुष्पार्पणम्।
- पिण्डे रालधूपम् । – रालधूपार्पणम्।
- पिण्डे तैलदीपः । – तैलदीपदानम्।
- पिण्डे माषान्ननैवेद्यम् । – माषनिर्मितं नैवेद्यदानम्।
- पिण्डे लोहमयी दक्षिणा । – लौहखण्डदानम्।

(सूतकान्ते सान्नोदककुम्भं कस्मैचिद् ब्राह्मणाय दद्यात्।)

एवं रीत्या उपचारैः पिण्डपूजनं कर्तव्यम्।

- **द्वितीयपिण्डः – (पान्थिकपिण्डः)**

ॐ अद्येत्यादि ० .......... गोत्रस्य .......... प्रेतस्य गृहवास्त्वादितुष्ट्यर्थं च द्वारदेशे **पान्थिक नाम एष पिण्डः** मद्त्तस्तवोपतिष्ठताम्।

संकल्पं कृत्वा द्वारे जलप्रोक्षणं कृत्वा दर्भोपरि पिण्डं स्थापयेत्। पूजनम् पूर्ववत् कुर्यात्।

- **तृतीयपिण्डः – (खेचरपिण्डः)**

ॐ अद्येत्यादि ० ......... गोत्रस्य .......... प्रेतस्य चत्वरे **भूतकोटिपलायनकामः खेचरनाम एष पिण्डः** मद्त्तस्तवोपतिष्ठताम्।

संकल्पं कृत्वा चत्वरे (चतुर्मार्गे) जलप्रोक्षणं कृत्वा दर्भोपरि पिण्डः स्थापयेत्। पूजनम् पूर्ववत् कुर्यात्।

- **चतुर्थपिण्डः – (भूतपिण्डः)**

ॐ अद्येत्यादि ० .......... गोत्रस्य .......... प्रेतस्य मध्यविश्रामे (ग्रामश्मशानयोर्मध्य भागः) **पिशाचादि-अविदनकामः भूतनाम एष पिण्डः** मद्त्तस्तवोपतिष्ठताम्।

संकल्पं कृत्वा मध्यविश्रामे जलप्रोक्षणं कृत्वा दर्भोपरि पिण्डं स्थापयेत्। पूजनं पूर्ववत् कुर्यात्। ततः अग्रपादं शवं गृहीत्वा दाहदेशं नयेयुः। श्मशानदेशं प्राप्य शुद्धां भूमौ शनैर्दक्षिणाशिरसं शवं संस्थाप्य चिताभूमिं संशोध्य गोमयादिभिरुपलिप्य दहनपर्याप्तं काष्ठचयं कृत्वा काष्ठान् समप्रोक्ष्य दक्षिणशिरसं शवं संस्थाप्य घृतेनाभ्यञ्जनं कर्तव्यम्।

- **पञ्चमपिण्डः - ( साधकपिण्डः )**

ॐ अद्येत्यादि ० .......... गोत्रस्य .......... प्रेतस्य चितायां यमदूततुष्ट्यर्थं शान्त्यर्थं वा शवस्य दक्षिणहस्ते साधकनाम पिण्डः मद्दत्तस्तवोपतिष्ठताम्।

संकल्पं कृत्वा शवस्य दक्षिणहस्ते जलप्रोक्षणं कृत्वा दर्भोपरि पिण्डः स्थापयेत्। पूजनं पूर्ववत् कुर्यात्।

अनेन पिण्डदानेन प्रेतस्य असद्गतिविनाशः (सव्यम्) सद्गतिरुत्तमलोकप्राप्तिः।

ततः पुरुषस्य शिरः प्रदेशे स्त्रियाः पादाग्रे त्रिकोणाकारं स्थण्डिलं कृत्वा

पञ्चभूसंस्कारपूर्वकं क्रव्यादग्निं प्रज्वाल्य। गन्धादिभिः संपूज्य प्रार्थयेत्-

**त्वं भूतभृज्जगद्योनिस्त्वं भूतपरिपालकः।**

**मृतः सांसारिकस्तस्मादेनं त्वं स्वर्गतिं नय॥**

**भावार्थः** - त्वं सर्वेषां प्राणीनां परिपालकः भर्ता तथा जन्मदाता असि। एषः सांसारिकः मृतः तस्माद् एनं त्वं स्वर्गं प्रति नय।

इति संप्रार्थ्य ''अग्नये नमः'' इति एकाम् आहुतिं पत्रपुटमुखेन जुहुयात्। ततः तुलसीकाष्ठ-तृणादीन् गृहीत्वा अग्निं प्रज्वाल्य वैपरित्यं प्रदक्षिणम्। मुखे अग्निदाहं कुर्यात्। अर्धदग्धे शवे सति पुनः ''अग्नये नमः'' इति एकाम् आहुतिं पत्रपुटमुखेन जुहुयात्।

- **दाहाञ्जलिः** -

ॐ अद्येत्यादि० .......... गोत्रस्य .......... प्रेतस्य चितादाहोपशमनार्थम् एष तिलतोयाञ्जलिः मद्दत्तस्तवोपतिष्ठताम्।

त्रिवारं तिलाञ्जलिं दद्यात्।

- **षष्ठपिण्डः ( प्रेतपिण्डः )** -

ॐ अद्येत्यादि० .......... गोत्रस्य .......... प्रेतस्य दाहान्ते **श्मशानभूमिवासिदेवतानां तुष्ट्यर्थं प्रेतनाम पिण्डः** मद्दत्तस्तवोपतिष्ठताम्। पूजनम् पूर्ववत्।

अनेन पिण्डदानेन तस्य प्रेतस्य प्रेतत्व निवृत्तिः (सव्यम्) सद्गतिरुत्तमलोकप्राप्तिः।

## शब्दार्थाः

**शवः** मृतशरीरः, **तिर्यक्** वक्रः, अधमयोनिप्राप्तः, **द्रव्यम्** धनम्, **चूर्णम्** पिष्टम्, **कुम्भः** घटः, **दर्भः** कुशः, **शिरः** मस्तकः **पत्रपुटः** पत्रशरावः, **निवृत्तिः** मुक्तिः।

## स्वाध्यायः

**1. कोष्ठकप्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा रिक्तस्थानानि पूरयत।**

(1) षट्-पिण्डी .......... निवृत्तये भवति। (तिर्यग्योनिः/सद्गतिः/स्वर्गः)

(2) गोदानं .......... करणीयम्। (सूतकान्ते/साक्षात्/जन्मान्ते)

(3) प्रथमपिण्डस्य .......... नाम अस्ति। (शिवः/शवः/रुद्रः)

(4) ..........चूर्णेन पिण्डनिर्माणं भवति। (चणकस्य/अक्षतस्य/निवारस्य)

(5) पिण्डे .......... दक्षिणा दातव्या। (सुवर्ण/लोह/कांस्य)

(6) चिताभूमिं संशोध्य ......... उपलेपनम्। (गोमूत्रेण/गोमयेन/जलेन)

(7) चिताग्रेः प्रदक्षिणा .......... रीत्या भवति। (विपरीत-/सव्य/अपसव्य-)

**2. निम्नलिखितप्रश्नानाम् एकवाक्येन उत्तरं लिखत।**

(1) षट्-पिण्डे कस्य धूपः दातव्यः ?

(2) सूतकान्ते ब्राह्मणाय किं दातव्यम् ?

(3) पिण्डानां स्थापनं कस्योपरि भवति ?

(4) केन तीर्थेन जलप्रोक्षणम् ?

(5) दर्भं कया रीत्या स्थापयेत् ?

(6) नैवेद्यं कीदृशं भवेत् ?

(7) तृतीयः पिण्डः किमर्थं दीयते ?

**3. निम्नलिखित प्रश्नानां द्वित्रिवाक्यैः उत्तरं लिखत।**

(1) षट्-पिण्डी कदा भवति ?

(2) पिण्डपूजनोपचारान् लिखत।

(3) षट्-पिण्डाः किमर्थं कुत्र च दीयन्ते इति नामोल्लेखन-पूर्वकं लिखत।

(4) क्रव्याद् प्रार्थनायाः श्लोकं लिखत।

(5) पिण्डोपचारेषु किं किं दीयते ?

**3. निम्नलिखित प्रश्नानां सविस्तरम् उत्तरं लिखत।**

(1) षट्-पिण्डीकरण महत्त्वं सविस्तरं प्रतिपादयत।

(2) षट्-पिण्डीकरणतात्पर्यं लिखत।

**4. ''क'' एवं ''ख'' विभागयोः यथायोग्यं मेलनं कुरुत।**

| क | ख |
|---|---|
| (1) प्रथमपिण्डः | चितायां शवहस्ते |
| (2) षष्ठपिण्डः | शवस्थाने |
| (3) पञ्चमपिण्डः | दाहान्ते |
| (4) तृतीयपिण्डः | मध्यविश्रामे |
| (5) चतुर्थपिण्डः | चत्वरे |

**5. निम्नलिखित शब्दानां विलोमशब्दाः लिखत।**

(1) निवृत्तिः (2) मृतः (3) अग्रे

(4) पुरुषः (5) अर्धः

●

# १८ शौचाशौचनिर्णयः

**प्रस्तावना**

धर्मस्य षट् प्रकाराः भवन्ति। वर्णधर्मः, आश्रमधर्मः, वर्णाश्रमधर्मः, गुणधर्मः, निमित्तधर्मः, साधारणधर्मश्च। तत्र भवति एक अन्यतमः निमित्तधर्मः। निमित्तधर्मो नाम कृतस्य अनुष्ठानेन वा प्रतिषिद्धकरणेन प्रायश्चित्तम्। निमित्तम् अर्थात् पापं तदधिकृत्य कल्पितो धर्मः निमित्तधर्मः। तत्र एव प्रायश्चिताधिकरणे निमित्तधर्मः भवति शौचाशौचनिर्णयः। शौचम् अर्थात् शुद्धत्वम् एवम् अशौचम् अर्थात् अशुद्धत्वं यद् शौचं भवति तस्य निवारणमपि भवति। तदेव प्रायश्चित्तमिति। प्रायश्चित्तं किमर्थम्? इति चेत्-

**प्रायश्चित्तमकुर्वाणाः, पापेषु निरता नराः।**


**अपश्चात्तापिनः कष्टान्नरकान्यान्ति दारुणात्॥**

**( याज्ञवल्क्य स्मृति, प्रायश्चित्ताध्याय-221 )**

तर्हि प्रश्नाः भवन्ति, किन्नाम शौचं वा अशौचम्? किं नाम पापम्? किं तस्य निवारणम् एतेषामेव प्रश्नानां निवारणं सम्यक्तया वयम् अस्मिन् प्रकरणे पठिष्यामः।

---

शौचाशौचनिर्णये प्रथमं प्रश्नः भवति किमिदं शौचमशौचं वा? कश्चतयोः अर्थः? तर्हि तयोः लक्षणं जानीमः -



- **शौचाशौचस्य लक्षणम्** -

‘‘शुच्’’ धातोः कि-प्रत्यये कृते शुचिशब्दः निष्पद्यते। अत्र शुचिः अर्थात् विमलम् अमलं शुद्धं पवित्रं वा। शुचेः भावः शौचम्। इतिकृत्वा शौचं नाम शुद्धत्वं पवित्रत्वं वा। शौचस्य (शुद्धत्वस्य) अभाव एव अशौचम्।

- **अशौचस्य लक्षणम्** -

अशौचस्य अर्थः भिन्नैः भिन्नैः धर्मशास्त्रकारैः भिन्नः भिन्नः एव कृतः।

- **मित्रमिश्रः** -

‘‘संध्यापञ्चमहायज्ञादिकर्मानधिकारसम्पादकोऽतिशयविशेषमशौचम्’’। अर्थात् - संध्याकरणे पञ्चमहायज्ञकरणे येन प्रतिषेधो भवति, तदेव अशौचम् अशौचसम्बन्धस्य अभाव एव शौचम्।

- **भट्टाचार्यः** -

**‘‘शुद्ध्यभावः अशौचम्’’।**

शुद्धेः अभावः अशुद्धिः अर्थात् पापक्षयः धर्मायोग्यत्वञ्च। पापानि अत्र षड्-विधानि भवन्ति।

महापातकम्, अनुपातकम्, उपपातकम्, अपात्रीकरणम्, मलिनीकरणम्, प्रकीर्णकम्। एतेषां पापानां क्षयः शुद्धिः। धर्मयोग्यत्वमर्थात् यज्ञयागादिषु नित्यकर्मसु च पापक्षयपूर्वकं सामर्थ्यम्।

- **रुद्रधरः -**

  **''सर्वकर्माणि कर्तुं योग्यताकारणं शुद्धिः तद्विपरीतं जननमरणादिना उत्पन्ना अशुद्धिः एव अशौचम्।''**

  अशौचम् तत्र द्विविधं भवति। **उक्तमपि देवलेन -**

**''अशौचं द्विविधं प्रोक्तं, बाह्यं चाभ्यन्तरं तथा''।**

तत्र बाह्यमशौचं यैः कारणैर्भवति। तानि च जन्म, मरणम्, अनुलोमविवाहः, शिशुमृत्युः, गर्भस्त्रावः, गर्भपातनम्, ऋतुस्त्रावः इत्यादीनि।

पुनरपि आशौचं द्विविधं भवति -

1 सपिण्डबान्धवजन्यम्

2 एकपुरुषजन्यम्

- अत्र सपिण्डाः के भवन्ति? इति प्रथमं ज्ञातव्यम्।

**लोपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः।**
**पिण्डदः सप्तमस्तेषां सापिण्ड्यं साप्तपौरुषम्॥**

- स्वतः प्रारभ्य सप्तपुरुषपर्यन्तं सापिण्ड्यं भवति।
- अविवाहितायाः नार्याः स्वतः पुरुषत्रयपर्यन्तं सापिण्ड्यं भवति।
- स्वतः प्रारभ्य चतुर्दश-पुरुष-पर्यन्तं समानोदकभावः भवति।
- अशौचनिवारणे बहवः उपायाः भवन्ति यथा -

**कालोऽग्निः कर्ममृद्वायुर्मनोज्ञानां तपो जलम्।**
**पश्चात्तापो निराहारः सर्वेऽमी शुद्धिहेतवः॥**

- अत्र कालशुद्धिः किञ्चिद् प्रस्तूयते -
  - मृत्योः पश्चात् दशरात्रपर्यन्तम् अशौचं भवति।
  - वेदज्ञः अग्निहोत्री च ब्राह्मणः एकेन दिवसेन शुद्धो भवति। मृत्युना चतुर्थसंततिं दशरात्रपर्यन्तं, पञ्चमसंततिं षड्-दिवसात्मकं, सप्तसंततिम् एकदिवसात्मकतम् अशौचं भवति।
  - जननेन मरणेन च स्वसम्पूर्णजात्याम् अशौचं भवति।
  - प्रेतशतकानुसारं सपिण्डेषु दशरात्रपर्यन्तं सकुल्येषु दिवसत्रयात्मकम् अशौचं गोत्रजेषु च स्नानेन शुद्धिः भवति।

एकस्मिन् अशौचे यदि द्वितीयम् अशौचम् आपतेत्, तर्हि समस्तं गोत्रम् अस्पृश्यं भवति। तथा दशरात्रपर्यन्तं स्पर्शनिषेधः भवति।

- जन्मपश्चात् अथवा जन्मना यदि बालकः मृतः स्यात् तर्हि सपिण्डेषु दशरात्रपर्यन्तम् अशौचं भवति।
- नामकरणात् एकरात्रम् अशौचं भवति। उपनयनसंस्कारेण अपि ब्राह्मणाय दशरात्रपर्यन्तम्, क्षत्रियाय द्वादशदिवसात्मकम्, वैश्याय पञ्चदशदिवसात्मकम्, शूद्राय त्रिंशद्दिवसात्मकं तथा उपनयनात् प्राक् दिवसत्रयात्मकं समस्तवर्णेषु अशौचं भवति।

- यः तिलोदकं ददाति, तस्मै अपि दिवसत्रयात्मकं हि अशौचं भवति।
- षण्मासात्मकस्य बालकस्य मृत्युना त्रिदिवसात्मकं, सप्तमासात्मकस्य तु पञ्चदिवसात्मकं, त्रिवर्षपर्यन्तस्य पञ्चदिवसात्मकं, षड्-वर्षीयस्य एकमासात्मकं, गर्भपातेन तु दशदिवसात्मकम् अशौचं भवति।
- पौगण्डबालकस्य मृत्योः दुग्धाञ्जलिरेव भवति। एकादशाह-द्वादशाहादिकं तस्य न भवति।
- चूडाकर्मपश्चाद्यदि मृत्युर्भवति चेदेव वृषोत्सर्गः कारयितव्यः।
- मासत्रयेन यदि गर्भः पतेत्, तर्हि स गर्भस्राव: इत्युच्यते। तेन दिवसत्रयात्मकमशौचं मात्रे एव भवति, न तु सपिण्डेभ्यः।
- षड्भिः मासैः यदि गर्भः पतेत् तर्हि सः गर्भपातो भवति। तेन मात्रे एकमासात्मकं तथा सपिण्डेभ्यः दिवसत्रयात्मकम् अशौचं भवति।
- सूतिकायाः स्पर्शनिषेधोऽपि कथितः तया सह स्पर्शेण बान्धवानां दशरात्रपर्यन्तम् अशौचं भवति।
- यः स्नानं दानं वा अग्निहोत्रं नाचरति, सः सदा अशौचे भवति।
- ब्रह्मचारिणां हि अशौचं न भवति।

- **अशौचे कर्मनिषेधः**

अत्र संक्षेपेण अशौचं निर्दिष्टम्, अत्र कानिचन कर्माणि निषिद्धानि भवन्ति। यथा -

अध्ययनम्, संध्या, स्मार्ताग्निहोमः, पञ्चयज्ञाः, दानम्, प्रतिग्रहः, पितृकर्म, भगवद्वन्दनम् इत्यादीनि।

**शब्दार्थाः**

**निवारणम्** - निराकरणम्, **निवृत्तेः** उपायः, **पापम्** अघः, **दारुणात्** घोरात्, **वायुः** पवनः, **अग्निः** हुतवहः, **मरणम्** मृत्युः, **जननम्** जन्म, **वृषोत्सर्गः** नीलोद्वाहः, **पितृकर्म** श्रद्धादिपितृविषयकं कर्म, **प्रतिग्रहः** प्रदानम् **पौगण्डः** दन्तरहितः

**स्वाध्यायः**

**1. कोष्ठकप्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा रिक्तस्थानानि पूरयत।**

(1) शौचम् अर्थात् .......... । (शुद्धत्वम्/अशुद्धत्वम्/पापम्)

(2) 'शुच्' धातोः .......... प्रत्यये कृते शुचिशब्दः भवति। (कि/टा/णिनि)

(3) महायज्ञाः .......... सन्ति। (सप्त/नव/पञ्च)

(4) भट्टाचार्यस्य मतेन शुद्ध्यभावः अर्थात् .......... । (शौचम्/अशौचम्/पापम्)

(5) देवलेन .......... अशौचम् उक्तम् अस्ति। (द्विविधम्/एकविधम्/त्रिविधम्)

(6) गोत्रजेषु ......... शुद्धिः भवति। (स्नानेन/जलपानेन/देवदर्शनेन)

(7) .......... हि अशौचं न भवति। (ब्रह्मचारिणम्/गृहस्थीनाम्/शूद्राणाम्)

**2. अधस्तनप्रश्नानाम् एकवाक्येन उत्तराणि यच्छत।**

(1) निमित्तधर्मो नाम किम्?

(2) दारुणान् नरकान् के यान्ति?

(3) मित्रमिश्रमतेन अशौचलक्षणम् किम् ?

(4) देवलमतेन द्विविधम् अशौचं किम् ?

(5) सपिण्ड्यं कुतः प्रारभ्य कुत्र पर्यन्तं भवति ?

(6) प्रेतशतकानुसारं सपिण्डेषु कति रात्रम् अशौचं भवति ?

(7) कस्याः स्पर्शनिषेधोऽपि कथितः ?

**3. अधस्तनप्रश्नानां द्वित्रिवाक्यैः उत्तराणि यच्छत।**

(1) धर्मशब्दस्य कति प्रकाराः ? के च ते ?

(2) शौचलक्षणं किम् ?

(3) बाह्यशौचकारणानि कानि सन्ति ?

(4) अशौचनिवारणोपायः कः ?

(5) अशौचे कानि कर्मनिषिद्धानि सन्ति ?

**4. निम्नलिखित प्रश्नानां सविस्तरम् उत्तरं लिखत।**

(1) अशौचनिवारणोपायाः विस्तरेण प्रतिपादयत।

(2) षाण्मासिकादारभ्य पौगण्डबालकस्य पृष्ठे करणीयानि कर्माणि लिखत।

(3) गर्भस्रावादीनाम् अशौचं लिखत।

**5. निम्नलिखित शब्दानां विलोमशब्दाः लिखत।**

(1) शौचम् (2) जननम् (3) पापम्

(4) बाह्यम् (5) मृतः

**6. ''क'' एवं ''ख'' विभागयोः यथायोग्यं मेलनं कुरुत।**

| **क ( अशौचम् )** | **ख ( दिनानि )** |
|---|---|
| (1) मृत्युः | पञ्चदिनं यावत् |
| (2) अग्निहोत्री ब्राह्मणः | दिनत्रयम् |
| (3) सकुल्येषु | पञ्चदशदिनम् |
| (4) सप्तमासे बालके मृते | एकदिवसः |
| (5) स्वकर्मपरायणशूद्राय | दशरात्रम् |

**छात्रप्रवृत्तिः**

छात्राः अशौचविषये केन निमित्तेन कति दिनानां सूतकम् इति कोष्टकस्य निर्माणं करिष्यन्ति।

**अध्यापक प्रवृत्तिः**

शिक्षकः अन्येषां शौचाशौचनिर्णायकानां ग्रन्थानां विषये मार्गदर्शनं दास्यति।

●

| १९ | कुम्भविवाहप्रयोगः |
|---|---|

**प्रस्तावना**

अस्माकं भारतीयसंस्कृतौ वेदानां बहुमहत्त्वं वर्तते वेदानां षडङ्गानि सन्ति।

**शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसामिति।**

**ज्योतिषामयनं चैव षडङ्गो वेद उच्यते॥**

उक्तं अस्ति ''ज्योतिषमयनं चक्षुः'' ज्योतिषं, चक्षुरूपम् अङ्गम् अस्ति। अनेनाङ्गेन अस्माकं जीवने किं किं भविष्यति इति वयं अवगन्तुं शक्नुमः, अस्माकं कुंडल्यां बहवः योगपरिचयार्थं ज्योतिषम् आवश्यकम्।

अस्मिन् पाठे वयं विषयोगः कदा भवति एवं तस्य निवारणं कथं भवति तज्जानीमः।

---

**विषकन्यायोगाः**



**भौजङ्गे कृत्तिकायां शतभिषजि तथा सूर्यमन्दारवारे**

**भद्रासंज्ञे तिथौ या किल जननमियात्सा कुमारी विषाख्या।**

**लग्नस्थौ सौम्यखेटावशुभगगनगश्चैक आस्ते ततो द्वौ**

**वैरिक्षैत्रानुयातौ यदि जनुषि तदा सा कुमारी विषाख्या॥**

**भावार्थः** - आश्लेषा, कृत्तिका एवं शततारका-नक्षत्रे रविः, शनिः एवं भौमवासरे द्वितीया सप्तमी, एवं द्वादशी योगे यस्याः कन्यायाः जन्म भवति सा विषकन्या कथ्यते।

- आश्लेषा, नक्षत्रं रविवासरः एवं द्वितीया योगे जन्म भवति चेत् सा विषकन्या कथ्यते।
- कृतिकानक्षत्रं, शनिवासरः एवं सप्तमी तिथौ यस्याः जन्म भवति सा विषकन्या भवति।
- शततारानक्षत्रं, भौमवासरः एवं द्वादशी, योगे यस्याः जन्म भवति सा विषकन्या भवति।
- जन्मसमये द्वौ शुभग्रहौ लग्ने स्यातां एकः पापग्रहः दशमस्थाने एवं द्वौ पापग्रहौ षष्ठे स्थाने स्यातां चेत् सा विषकन्या भवति।

| नक्षत्रम् | वारः | तिथिः |
|---|---|---|
| आश्लेषा | रविः | द्वितीया |
| कृतिका | शनिः | सप्तमी |
| शततारा | भौमः | द्वादशी |

**बालवैधव्यदोषपरिहारः**

**जन्मोत्थं च विलोक्य बालविधवायोगं विधाय व्रतं**

**सावित्र्या उत पैप्पलं हि सुतया दद्यादिमां वा रहः।**

**संल्लग्नेऽच्युतमूर्तिपिप्पलघटैः कृत्वा विवाहं स्फुटं**

**दद्यातां चिरजीविनेऽत्र न भवेद्दोषः पुनर्भूभवः॥**

**भावार्थः** - कन्यायाः जन्मकुंडल्यां बालवैधव्यकारकः योगः स्यात् चेत् कन्यायाः पितरौ एकान्ते कन्यां नीत्वा निश्चियपूर्वकं सावित्रीव्रतं कारयित्वा एवं पैपलव्रतं कारयिता एवं विष्णुप्रतिमा अश्वत्थः एवं कुम्भः एतैः सह विवाहं कृत्वा इयं कन्या चिरंजीववराय देया एनेनोयायेन वैधव्यदोषपरिहारः भवति एवं द्वाभ्यां वराभ्यां सह विवाहदोषोऽपि नश्यति।

कन्यापिता सपत्नीकः कुम्भविवाहोक्तान् सम्भारानादाय देवालयं गत्वा शुभासने प्राङ्मुख उपविश्य आचमनं प्राणायामञ्च कृत्वा स्वकन्याया विषकन्यात्वदोषपरिहारार्थं कुम्भविवाहं कुर्यात्।

**सङ्कल्पः**

विष्णुर्विष्णुर्विष्णुः श्रीमद्भगवतो. इत्यादि पठित्वा एवगुणविशेषेण विशिष्टायां शुभपुण्यतिथौ मम अस्याः कन्यायाः नक्षत्रादियोगेने ग्रहयोगेन च विषाख्यायोगजननन-सूचितवैधव्यारिष्टपरिहारार्थं श्रीपरमेश्वरप्रीत्यर्थं कुम्भविवाहाख्यं कर्म करिष्ये॥ पुनर्जलमादाय। तत्रादौ निर्विघ्नतासिद्धयर्थं गणपतिपूजनं स्वस्तिपुण्याहवाचनं मातृकापूजनं वसोर्धारापूजनं वैश्वदैवसङ्कल्पं नान्दीश्राद्धम् आचार्यवरणञ्च करिष्ये। तत्रादौ दिग्रक्षणं कलशार्चनञ्च करिष्ये। इति दिग्रक्षणादि कृत्वा ततो गणपतिपूजनाद्याचार्यवरणान्तं कुर्यात्।

ततो मुख्यदेवतायाः स्थापने कलशं निधाय स्वर्णमयविष्णुरूपाश्वत्थद्रुमप्रतिमाया अग्न्युत्तारणं कुर्यात्।

**अग्न्युत्तारणम् -**

**जलमादाय -**

अस्याः मूर्तेः निर्माणविधौ अग्निप्रतपन-ताडन-अवघातादि दोष परिहारर्थम् अग्न्युत्तारणपूर्वकं प्राणप्रतिष्ठां च करिष्ये।

- **समुद्रस्य त्त्वावकयाग्ग्ने परिव्व्ययामसि।**
  **पावकोऽअस्मब्भ्य ꣳ शिवो भव॥**
- **हिमस्य त्त्वा जरायुणाग्ग्ने परिव्ययामसि।**
  **पावकोऽअस्मब्भ्य गूँ शिवो भव॥**
- **उपज्ज्मन्नुपवेतसेवतरनदीष्वा।**
  **अग्ग्ने पित्तमपामसि मण्डूकिताभिरागहि सेमन्नो यज्ञम्पावकवर्ण्णꣳ शिवङ्कृधि॥**
- **अपामिदन्न्ययन ꣳ समुद्रस्य निवेशनम्।**
  **अन्न्याँस्तेऽअस्मत्तपन्तु हेतयः पावकोऽअस्मब्भ्यꣳ शिवो भव॥**
- **अग्ग्ने पावकरोचिषा मन्द्रया देव जिह्वया।**
  **आ देवान्वक्षि यक्षि च॥**
- **स नः पावक दीदिवोग्ग्ने देवा रँ॥ ऽइहावह।**
  **अप यज्ञ ꣳ हविश्च नः॥**
- **पावकया यश्चितयन्त्या कृपा क्षामन्नुरुचऽउषसो न भानुना।**
  **तूर्व्वन्न यामन्नेतशस्य नूरणऽआयोघृणे न ततृषानोऽअजरः॥**
- **नमस्त्ते हरसे शोचिषे नमस्त्तेऽअस्त्वर्चिषे।**
  **अन्न्याँस्तेऽअस्मत्तपन्तु हेतयः पावकोऽअस्मब्भ्य ꣳ शिवो भव॥**
- **नृषदेव्वेडप्पसुषदेव्वेड्ड्बर्हिषदेव्वेड्ड्वनसदेव्वेट्टस्वर्व्विदेव्वेट्॥**
- **ये देवा देवानाँय्यज्ञिया यज्ञियाना ꣳ सँव्वत्त्सरीणमुपभागमासते।**
  **अहुतादो हविषो यज्ञेऽअस्मिन्त्स्यम्पिबन्तु मधुनो धृतस्य॥**

- **ये देवा देवेष्वधि देवत्त्वमायन्ये ब्ब्रह्मण: पुरऽएतारोऽअस्य।**
  **येब्भ्यो नऽऋते पवतै धाम किञ्चन न ते दिवो न पृथिव्व्याऽअधि सनुषु॥**
- **प्राणदाऽअपानदाव्व्यानदाव्वर्च्चोदाव्वरिवोदा:।**
  **अन्न्याँस्तेऽअस्म्मत्तपन्तु हेतय: पावकोऽअस्म्मब्भ्य ँ शिवो भव॥**

**( श.यजु. अ. 17, मं. 4 त:15 )**

**अग्निवैश्वानरो वह्निर्वीतिहोत्रो धनंजय:।**
**अग्नेरुत्तारणार्थाय मूर्तीनां शुद्धिहेतवे॥ ( त्रिवारम् )**

एवं जलधारां कृत्वा प्राणप्रतिष्ठापनं कुर्यात्।

**जलमादाय: -**

अस्य श्री प्राणप्रतिष्ठा मंत्रस्य ब्रह्मविष्णुरुद्राऋषय: ऋग्यजु: सामानि छंदासि परा प्राणशक्तिर्देवता आं बीजम् ह्रीं शक्ति: क्रों कीलकम् आसाम् मूर्तीनां प्राणप्रतिष्ठापने विनियोग:। मूर्तिषु हस्तं निधाय पठेत्।

ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हों ॐ क्षं सं हं स: ह्रीं ॐ आं ह्रीं क्रों अस्या: विष्णुमूर्ते: प्राणा इह प्राणा:।

ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हों ॐ क्षं सं हं स: ह्रीं ॐ आं ह्रीं क्रों अस्या: विष्णुमूर्ते: जीव इह स्थित:।

ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हों ॐ क्षं सं हं स: ह्रीं ॐ आं ह्रीं क्रों अस्या: विष्णुमूर्ते: सर्वेन्द्रियाणि वाङ्मनस्त्वक्चक्षु: श्रोत्रजिह्वाघ्राणपाणिपादपायूपस्थानि इहैवागत्य सुखंचिरं तिष्ठन्तु स्वाहा।

**जलमादाय: -**

ततो गर्भाधानादि षोडशसंस्कार सिद्ध्यर्थं षोडशप्रणवावृत्तिं करिष्ये।

ॐ (ह्रीं) इति षोडशवारम् उच्चरेत्। अस्या: विष्णुमूर्ते: षोडश संस्कारा: संपद्यन्ताम्। हस्ते अक्षतान् गृहीत्वा-

**मन्त्र: - मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्वरिष्टँयज्ञ ँ।**
**समिमन्दधातु विश्वे देवासऽइह मादयन्तामो३म्प्रतिष्ठ॥**

अस्यै प्राणा: प्रतिष्ठन्तु अस्यै प्राणा: क्षरन्तु च। अस्यै देवत्वमर्चायै मामहेति न कश्चन॥

तत आवाहनादिषोडशोपचारपर्यन्तं पूजनं कृत्वा प्रार्थयेत्।

**वाजसनेयीनां षोडशोपचारपूजाक्रम:**

| **क्रम** | **मंत्र** | **उपचार:** |
|---|---|---|
| 1. | सहस्त्रशीर्षे | आवाहनम् |
| 2. | पुरुषऽएव | आसनम् |
| 3. | एतावानस्य | पाद्यम् |
| 4. | त्रिपादूर्ध्व | अर्घ्यम् |
| 5. | ततोव्विराडजायत् | आचमनीयम् |
| 6. | तस्माद्यज्ञा | स्नानम् |
| 7. | तस्माद्यज्ञात्सर्वहुत | वस्त्रम् |
| 8. | तस्मादस्वा | यज्ञोपवीतम् |
| 9. | तंय्यज्ञम् | गन्धम् |
| 10. | पुरुषऽएव | पुष्पम् |
| 11. | ब्राह्मणोऽस्य | धूपम् |

| | | |
|---|---|---|
| 12. | चन्द्रमामनसो | दीपम् |
| 13. | नाब्भ्याऽआसी | नैवेद्यम् |
| 14. | यत्पुरुषेण | दक्षिणायुक्तताम्बूलम् |
| 15. | सप्तास्या | आरार्तिकपूर्वकप्रदक्षिणा: |
| 16. | यज्ञेनयज्ञ | मन्त्रपुष्पयुक्तो नमस्कार: |

**प्रार्थयेत्**

**वरुणाङ्गस्वरूपाय जीवनानां समाश्रय।**
**पतिं जीवय कन्यायाश्चिरं पुत्रसुखं कुरु॥**
**देहि विष्णो वरं देहि कन्यां पालय दु:खत:॥**

ततो यथोचित्तं मधुपर्कं कृत्वा वस्त्रालङ्काराणि समर्पयेत्॥ तत: कन्याकुम्भयोरन्तरे अन्तर्पटं धृत्वा कन्यां तस्य सम्मुखे प्रत्यङ्मुखीमुपवेश्य मङ्गलाष्टकं पठेत्।

**अथ मङ्गलाष्टकम्**

**श्रीमत्पङ्कजविष्टरो हरिहरौ वायुर्महेन्द्रोऽनल-**
**श्चन्द्रो भास्करवित्तपालवरुणप्रेताधिपादिग्रहा:॥**
**प्रद्युम्नो नलकूबरौ सुरगुरुश्चिंतामणि: कौम्तुभ:**
**स्वामी शक्तिधरश्च लाङ्गलधर: कुर्यात्सदा मंगलम्॥ 1॥**
**गौरी श्रीरदितिर्दितिश्च सुभगा कण्डू: सुपर्णा शिवा**
**सावित्री च सरस्वती च सुरभि: सत्यव्रताऽरुन्धती॥**
**स्वाहा जांबुवती च रुक्मभगिनी दु:स्वप्नविध्वंसिनी**
**वेला चांबुनिधे: सुमीनमकरा कुर्यात् सदा मंगलम्॥ 2॥**
**नेत्राणि त्रितयं महत्पशुपतेरग्रेस्तु पादत्रयं**
**तद्वद्विष्णुपदत्रयं त्रिभुवने ख्यातं च रामत्रयम्॥**
**गंगौघस्य गतित्रयं सुविमलं तद्वदृषीणां त्रयं**
**संध्यायास्त्रितयं द्विजैरभिमतं कुर्यात् सदा मंगलम्॥ 3॥**
**गंगा गोमतिगोपतिर्गणपतिर्गोविंदगोवर्धनौ**
**गीतागोमयगोरजो गिरिसुता गंगाधरो गौतम:॥**
**गायत्री गरुडो गदाधरगयागंभीरगोदावरी**
**गांधर्वगृहगोपगोकुलधर: कुर्यात् सदा मंगलम्॥ 4॥**
**अश्वत्थो वटवृक्षचन्दनतरुमंदारकल्पद्रुमो**
**जांबुर्निबकदंबकाम्रसरला वृक्षाश्च ये क्षीरिण:॥**
**सर्वैस्तै: फलपुष्पपल्लववरैर्युक्तै: सदा मंडितं**
**रम्यं चैत्ररथं सनंदनवनं कुर्यात् सदा मंगलम्॥ 5॥**
**वाल्मीक: सनक: सनंदनमुनिर्व्यासो वसिष्ठो भृगु-**
**र्जाबालिर्जमदग्निजह्नुजनको गर्गो गिरा गौतम:।**

**मांधाता ऋतुपर्णवेनसगरा धन्यो दिलीपो नलः**
**पुण्यो धर्मसुतो ययातिनहुषौ कुर्यात् सदा मंगलम्॥ 6॥**
**गंगा सिंधु सरस्वती च यमुना गोदावरी नर्मदा**
**कावेरी सरयूर्महेन्द्रतनया चर्मण्वती वेदिका॥**
**क्षिप्रा वेत्रवती महासुरनदी ख्याता गया गंडकी**
**पुण्याः पुण्यजलैः समुद्रसहिताः कुर्यात् सदा मंगलम्॥ 7॥**
**लक्ष्मीः कौस्तुभपारिजातकसुरा धन्वन्तरिश्चंद्रमा**
**गावः कामदुघा सुरेश्वरगजो रंभादिदेवाङ्गनाः॥**
**अश्वः सप्तमुखः सुधा हरिधनुः शंखो विषं चांबुधे**
**रत्नानीति चतुर्दश प्रतिदिनं कुर्वन्तु वै मङ्गलम्॥ 8॥**

''प्रतिष्ठ'' इति पठित्वा अन्तर्पटं निष्कास्य कन्यायै वस्त्रोपवस्त्रे दत्वा मंगलतंतुबंधनसमीक्षणान्तं कृत्वा दशवारमधस्तादुपरि च कुम्भं कन्यां च ''परित्वा'' इत्यनुवाकेन सूत्रेण संवेष्ट्य कुंभरूपविष्णवे कन्यादानं कुर्यात्॥

**मन्त्रः** - **परि त्त्वा गिर्व्वणो गिरऽइमा भवन्तु व्विश्श्वतः।**
**व्वृद्धायुमनु वृद्धयो जुष्ट्टा भवन्तु जुष्ट्टयः॥** **( शु. यजु. अ. 5, मं. 29 )**

**भावार्थः** - हे गिर्वण इन्द्र! स्तोत्र-शस्त्ररूपा गिरः त्वां सर्वतः कटरूपेण परिगृहणन्तु। किं भूतं त्वाम्। वृद्धायुम्। किं भूताः गिरः। अनुवृद्धयः। अस्मात् सेवाः तव प्रिया भवन्तु॥

**मन्त्रः** - **इन्द्रस्य स्यूरसीन्द्रस्यद्ध्रुवोसि।**
**ऐन्द्रमसि व्वैश्वदेवमसि॥** **( शु. यजु. अ. 5, मं. 30 )**

**भावार्थः** - हे रज्जो! त्वमिन्द्रस्यसीवनमसि। हे ग्रन्थे! त्वमिन्द्र-संबन्धी भूत्वा स्थिरो भवसि। हे सदः! त्वमिन्द्रसम्बन्धी भवसि। हे अग्नीध्र! त्वं सर्वदेवसंबन्धी भवसि॥

**मन्त्रः** - **व्विभूरसि प्प्रवाहणो व्वह्निरसि हव्व्यवाहनः।**
**श्वात्रोसि प्प्रचेतास्त्तुथोसि व्विश्श्ववेदाः॥** **( शु. यजु. अ. 5, मं. 31 )**

**भावार्थः** - हे आग्नीध्रीय ! धिष्ण्य! त्वं विभूः प्रवाहणश्चासि। हे होतृधिष्ण्य! त्वं वह्निर्हव्यवाहनश्चासि।
हे मैत्रावरुणधिष्ण्य। त्वं श्वात्रः प्रचेताश्चासि। हे ब्राह्मणाच्छंसि धिष्ण्य! त्वं तुथो विश्ववेदाश्चासि॥

**मन्त्रः - उशिगसिकविरङ्गारिरसिबम्भारिरवस्यूरसिदुवस्वाञ्छुन्ध्यूरसि मार्जालीयः**
**सम्म्राडसि कृशानुः परिषद्योसि पर्वमानो नभोसि प्प्रतक्क्वामृष्ट्टोसिहव्ययसूदनऽऋतधामासिस्वर्ज्योतिः॥**
**( शु. यजु. अ. 5, मं. 32 )**

**भावार्थः** - हे पोतृधिष्ण्य! त्वं कमनीयः विद्वाँश्चासि। हे नेष्टृधिष्ण्य! त्वमङ्गारिः बम्भारिश्चासि। हे अच्छआवाकधृष्णय! त्वमवस्यूः दुवस्वान् चासि। हे मार्जालीय धिष्ण्य! त्वं शुन्ध्यूरसि। हे उत्तरवेदिगताहवनीय! त्वं सम्म्राडसि कृशानुश्चासि। हे बहिष्पवमानदेश! त्वं परिषद्यः पवमानश्चासि। हे शामित्र! त्वं मृष्टः हव्यसूदनश्च असि। हे औदुम्बरि! त्वं ऋतधामा स्वर्ज्योतिश्च असि॥

**मन्त्रः** - **समुद्रोसि व्विश्श्वव्व्यचाऽअजोस्येकपादहिरसिबुद्धन्योव्वागस्यैन्द्रमसिसदोस्यृतस्यद्वारौमामा सन्ताप्तमद्ध्वनाद्ध्वपतेप्प्रमातिरस्वस्तिमेस्मिन्न्पथिदेवयाने भूयात्॥**
**( शु. यजु. अ. 5, मं. 33 )**

**भावार्थः** - हे ब्रह्मासनप्रदेश! त्वं समुद्रः विश्वव्याचाश्चासि। हे शालाद्वार्य ! प्राचीनवंशद्वारवर्तिन्नग्ने। त्वम् अजः एकपात् चासि। हे प्राजहित गार्हपत्याग्ने! त्वम् अहिः बुध्न्यश्चासि। हे सदः! त्वं वाक् ऐन्द्रं सदश्चासि। हे यज्ञस्य द्वारदेशस्थायिन्यौ शाखे! युवां मां प्रवेशनिष्क्रमणेन स्खलनादिना मा सन्तापयतम्। हे अध्वपते मार्गपालक सूर्य! त्वं मार्गाणां मध्ये मा प्रवर्धय। अस्मिन् देवभावप्रापके मार्गे कल्याणं भूयात्॥

**मन्त्रः - मित्रस्यमाचक्षुषेक्षध्द्वमग्गनयः सगराःसगरास्थसरेणनाम्नारौद्रेणानीकेनपातमाग्नयः पिपृतमाग्नयोगोपायतमानमोवोस्तुमामा हि ६ सिः॥**

**(शु. यजु. अ. 5, मं. 34)**

**भावार्थः** - हे ऋत्विजः! आदित्यस्य नेत्रेण मां पश्यत। हे अग्नयः! सगराः स्तुत्याः सहिताः यूयं स्तुतिसहितेन नाम्ना समान-स्तुतिभाजः भवथ। हे अग्नयः! यूयं शत्रुविनाशकत्वादुग्रेण भवदीयेन सैन्येन मां रक्षत। हे अग्नयः! यूयं मां धनादिभिः पूरयत। मां निरन्तरं रक्षत। युष्मभ्यं नमोऽस्तु। मां मा वधिष्ट। निर्विघ्नं यज्ञं निवर्तयत॥

**मन्त्रः - ज्योतिरसिव्विश्श्वरूपँव्विश्वेषान्देवाना ७ समित्।**

**त्व ६सोमतनूकृद्भ्योद्वेषोब्भ्योन्न्यकृतेब्भ्यऽउरुयन्तासिव्वरूथ७ स्वाहाजुषाणोऽअप्तुराज्यस्यव्वेतुस्वाहा॥**
**(शु. यजु. अ. 5, मं. 35)**

**भावार्थः** - हे आज्य! त्वं ज्योतिरसि। किं भूतम्। सर्वरूपं बहुषु आहुतिषु उपयुक्त्वात् विश्वरूपत्वम्। त्वं विश्वेषां देवानां समिन्धनमसि। देवाः आज्यं भुक्त्वा दीप्यन्ते। हेसोम ! त्वं तनूकृद्भ्यः द्वेषोभ्यः अन्यकृतेभ्यः बहुप्रकारं नियामकोऽसि त्वम् अस्माकं प्रभूतं बलमसि। तुभ्यमिदं हुतमस्तु। प्रीयमाणः सोमः आज्यं पिबतु। तस्मै इदं सुहुतमस्तु॥

**कन्यादानसंकल्पः**

विष्णुर्विष्णुर्विष्णुः श्रीमद्भगवतो महापुरुषस्य विष्णो... इत्यादि पठित्वा। एवंगुणविशेषेण विशिष्टायां शुभपुण्यतिथौ अस्याः कन्याया विषाख्ययोगजननवैधव्यदोषापनुत्तये श्रीविष्णुस्वरूपिणे अश्वत्थकुम्भाय श्रीरूपिणीमिमां कन्यां तुभ्यमहं सम्प्रददे। इति पठित्वा कन्याया दक्षिणहस्ते जलं दत्त्वा तद्धस्तं विष्णुस्वरूपायाश्वत्थकुम्भाय समर्प्य मन्त्रं पठेत्॥

**''गौरी कन्यामिमां श्लक्ष्णां यथाशक्ति विभूषिताम्।**

**ददामि विष्णवे तुभ्यं सौभाग्यं देहि सर्वदा॥''**

विष्णरूपिणे कुंभायेमां कन्यां संप्रददे॥ इति सर्मपयेत्॥ अनन्तरं वस्त्रग्रन्थिकादिकं विमुच्य कुम्भं गृहीत्वा जले निक्षिपेत्॥

ततः आचार्यः शुद्धजलेन ''ऐन्द्रवारूणपावमानीयमंत्रैः'' कन्यां पञ्चपल्लवेनाभिषिच्य शुद्धवाससी परिधापयेत्॥

ततः कन्या शुद्धोकेन स्नात्वा स्वयं धारितानि नूतनानि वस्त्राणि सालङ्कारणि आचार्याय दत्वा आचार्यायान्येभ्यश्च दक्षिणां दद्यात्। ततः आचार्यादीनां समीपे उपविश्य

''भो ब्राह्मणाः अहम् अनेन कुम्भविवाहकर्मणा अनघाऽस्मि?'' इति त्रिवारं ब्रूयुः॥

''**त्वमनघाऽसि एवमस्तु**'' इति आचार्यादयोऽपि त्रिवारं ब्रूयुः॥

ततः कर्मेश्वराय समर्प्य गणपतिप्रभृतिदेवानां विसर्जनं कुर्यात्॥

**॥ इति कुम्भविवाहः॥**

**शब्दार्थाः**

**कुम्भः** घटः, **भद्रासंज्ञे** भद्रानामके, **जलमादाय** जलं नीत्वा, **अर्चनम्** पूजनम्, **वित्तपालः** कुबेरः, **स्यूः** रज्जुः, **गिर्वाणः** इन्द्रः, **उशिक्** कमनीयः, **कविः** विद्वान्, **मित्रस्य** आदित्यस्य, **चक्षुषा** नेत्रेण, **ईक्षध्वम्** पश्यतः, **नः** अस्माकम्।

## स्वाध्यायः

**1. कोष्ठकप्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा रिक्तस्थानानि पूरयत।**

(1) वेदाङ्गेषु ज्योतिषं .......... अस्ति। (नयनम्/घ्राणः/पादः)

(2) वेदाङ्गानि .......... सन्ति। (पञ्च/षट्/सप्त)

(3) .......... नक्षत्रे विषयोगः न भवति। (अश्विनी/आश्लेषा/कृत्तिका)

(4) .......... तिथौ विषयोगः भवितुम् अर्हति। (पञ्चमी/षष्ठी/सप्तमी)

(5) स नः ..........दीदिवोग्ने। (नायकः/पावकः/संयोजकः)

(6) मुख्यदेवतायाः स्थापने ......... पूजनं भवति। (सूर्यस्य/शिवस्य/विष्णोः)

(7) अग्नेः पर्यायवाचि शब्दः .......... नास्ति। (अनिलः/धनञ्जयः/वह्निः)

**2. निम्नलिखित प्रश्नानाम् एकवाक्येन उत्तरं लिखत।**

(1) कुम्भविवाहः अत्र कः समासः ?

(2) केन अङ्गेन अस्माकं भविष्यं ज्ञातुं शक्नुमः ?

(3) विषयोग निवारणाय किं भवति ?

(4) आश्लेषा नक्षत्रे कस्मिन् वारे समागते विषयोगः भवति ?

(5) कृत्तिका नक्षत्रयोगे विषयोगयुक्तः वारः कः ?

(6) गर्भाधानादि षोडशसंस्कारार्थं किं करणीयम् ?

(7) कति रत्नानि सन्ति ?

**3. निम्नलिखित प्रश्नानां द्वित्रिवाक्यैः उत्तरं लिखत।**

(1) षडङ्गानि लिखत ?

(2) प्राणप्रतिष्ठायाः विनियोगं लिखत ?

(3) षोडशोपचारपूजाक्रमं लिखत ?

(4) एकादशनदीनां नामानि लिखत ?

(5) विषयोगः कदा भवति ?

**4. निम्नलिखित प्रश्नानां सविस्तरम् उत्तरं लिखत।**

(1) विषकन्यायोगान् चर्चयत्।

(2) वैधव्यदोष परिहारं चर्चयत्।

(3) कन्यादान संकल्पः।

**5. निम्नलिखित मंत्राणां पूर्तिं कृत्वा अर्थं लिखत।**

(1) परित्वागिर्व्वणो .....................

(2) इन्द्रस्य स्यूरसी................

(3) व्विभूरसिप्प्रवाहणो.................

(4) उशिगसि.................

(5) समुद्रोसि.................

**6. निम्नलिखित श्लोकानानां पूर्तिं कुरुत।**

(1) शिक्षाकल्पो........

(2) भौजङ्गे कृत्तिकायां..........

(3) जन्मोत्थं च................

(4) अग्निर्वैश्वानरो............

(5) अस्यै प्राणाः............

**छात्रप्रवृत्तिः**

छात्रैः सम्पूर्णं मङ्गलाष्टकस्य गानं कर्तव्यम्।

**अध्यापकप्रवृत्तिः**

अध्यापकेन सम्पूर्णं मङ्गलाष्टकं कण्ठस्थं कारयितव्यम्।

●

| २० | # पवमानसूक्तम् |
|---|---|

**प्रस्तावना**

**'मन्त्रब्राह्मणयोर्वेदनामधेयम्'**

वेदानां संहिताभागे मन्त्राणां विशुद्धं स्वरूपं सुरक्षितं भवति, येषां मन्त्राणां देवतानां स्तुतिं कर्तुं तथा विभिन्नयज्ञादीनां समये प्रयोगः भवति। ऋग्यजुस्सामाथर्वणेतिचतुर्वेदानां संहिताब्राह्मणारण्यकोपनिषदिति-चत्वारो विभागाः सन्ति। एतेषु वेदानां मन्त्रेषु नानादेवतानां प्रार्थना भवति। सा प्रार्थना एव 'सूक्तम्' इति नाम्ना व्यवह्रियते।

सु-उपसर्गपूर्वकम् वच् - धातोः भावे क्त - प्रत्यये 'सूक्तम्' इति शब्दः निष्पन्नः। 'वाचस्पत्यम्' इति ग्रन्थानुसारम् अस्य शब्दस्य 'विशिष्टैकार्थ-प्रतिपादके एकदैवत्ये मन्त्रसमुदाये' इत्ययमर्थो निरूपितः। नाम यस्मिन् कमप्येकं देवमुररीकृत्य तस्य स्तुतौ मन्त्रसमुदायः निरूपितः तदेव 'सूक्तम्' इति। बृहद्देवताग्रन्थकारः सूक्त-शब्दस्य परिभाषां ददाति, यथा - **'सम्पूर्णमृषिवाक्यं तु सूक्तमित्यभिधीयते॥'**

अर्थात् मन्त्रद्रष्टुः ऋषेः सम्पूर्णवाक्यं हि 'सूक्तम्' इत्युच्यते, यत्र एकस्मिन् वा अनेकेषु मन्त्रेषु देवतानां स्तुतिप्रार्थनादीनां समावेशो भवति। सूक्तस्य चत्वारो भेदाः सन्ति, यथा-

(1) देवता (2) ऋषिः (3) छन्दः (4) अर्थः इति।

वेदेषु पुरुषसूक्तम्, श्रीसूक्तम्, रुद्रसूक्तम्, शिवसङ्कल्पसूक्तम्, पवमानसूक्तम्, नारायणसूक्तम्, अग्निसूक्तम् इत्यादीनि नानादेवपराणि सूक्तानि समुपलभ्यन्ते। तत्र अन्यतमं सूक्तं वर्तते पवमानसूक्तम्।

पवमान शब्दस्य सामान्यः शाब्दिकार्थः विशुद्धिकर्ता, पावनकर्ता चेति भवति। पवमानशब्दस्य **'वाचस्पत्यम्'** इति ग्रन्थानुसारं वायुः, अग्निः, सोमदेवता, गार्हपत्याग्निः इत्यादयोऽर्थाः प्रदत्ताः। पवमानस्य विषये यथोक्तं मत्स्यपुराणे -

**'अथ यः पवमानस्तु निर्मख्योऽग्निः स उच्यते।**

**स च वै गार्हपत्योऽग्निः प्रथमो ब्रह्मणः सुतः॥'**

अत्र पाठेऽस्मिन् शुक्लयजुर्वेदस्य एकोनविंशतितमाध्यायस्थ-**पवमानसूक्तस्य** भावार्थेन सहितं निरूपणं प्रस्तूयते। अस्य सूक्तस्य प्रयोगः यजमानस्य अभिषेकार्थं क्रियते इति सुप्रसिद्धम्।

---

**मन्त्रः** - **ॐ पुनन्तु मा पितरः सोम्यासः पुनन्तु मा पितामहाः पुनन्तु मा प्रपितामहाः पवित्रेण शतायुषा।**
**पुनन्तु मा पितामहाः पुनन्तु मा प्रपितामहाः पवित्रेण शतायुषा विश्वमायुर्व्यश्नवै॥ 01॥**

**भावार्थः** - सौम्यताद्वारा परिपूर्णाः पितृगणाः अस्मभ्यं शतवर्षावधि-परिपूर्णेन जीवनेन अस्मान् पवित्रीकुर्वन्तु। तव कृपया इमाः सर्वाः दिशः मत्कृते रसपूर्णाः भवेयुः॥

**मन्त्रः** - **ॐ अग्नऽ आयूꣳषि पवसऽआ सुवोर्जमिषञ्च नः।**
**आरे बाधस्व दुच्छुनाम्॥ 02॥**

**भावार्थः** – दीर्घायुष्यप्रदायक यज्ञादिकर्मसम्पादयितः हे अग्ने! त्वं पृथिव्यां रसान् स्थापय। ओषधिषु अन्तरिक्षे द्युलोके च जलं स्थापय। हे अग्ने! तव कृपया इमाः सर्वाः दिशः मत्कृते रसपूर्णाः भवेयुः॥

**मन्त्रः** – **ॐ पुनन्तुमादेवजनाःपुनन्तुमनसाधियः।**

**पुनन्तु विश्वाभूतानिजातवेदःपुनीहिमा॥ 03॥**

**भावार्थः** – देवजनाः मां पवित्रं कुर्वन्तु। ते मनसा मम बुद्धिं पवित्रां कुर्वन्तु। सर्वभूतानि मां पवित्रं कुर्वन्तु। जातवेद हे अग्ने! त्वं मां पवित्रं करोतु॥

**मन्त्रः** – **ॐ पवित्रेण पुनीहि मा शुक्क्रेणदेव दीद्यत्।**

**अग्ने क्रत्वा क्रतूँ२ऽरनु॥ 04॥**

**भावार्थः** – पृथिव्यां रसान् स्थापय। ओषधिषु अन्तरिक्षे द्युलोके च जलं स्थापय। हे अग्ने! तव कृपया इमाः सर्वाः दिशः मत्कृते रसपूर्णाः भवेयुः॥

**मन्त्रः** – **ॐ यत्ते पवित्रमर्च्चिष्यग्ने विततमन्तरा।**

**ब्रह्म तेन पुनातु मा॥ 05॥**

**भावार्थः** – त्वं पृथिव्यां रसान् स्थापय। ओषधिषु अन्तरिक्षे द्युलोके च जलं स्थापय। हे अग्ने! तव कृपया इमाः सर्वाः दिशः मत्कृते रसपूर्णाः भवेयुः॥

**मन्त्रः** – **ॐ पवमानः सोऽअद्यनः पवित्रेण विचर्षणिः।**

**यः पोता स पुनातु मा॥ 06॥**

**भावार्थः** – हे पवमान! त्वं पृथिव्यां रसान् स्थापय। ओषधिषु अन्तरिक्षे द्योलोके च जलं स्थापय। हे अग्ने! तव कृपया इमाः सर्वाःदिशः मत्कृते रसपूर्णाः भवेयुः॥

**मन्त्रः** – **ॐ उभाम्यान्देवसवितःपवित्रेणसवेनच।**

**मा पुनीहि विश्वतः॥ 07॥**

**भावार्थः** – हे सवितः! त्वं पृथिव्यां रसान् स्थापय। ओषधिषु अन्तरिक्षे द्युलोके च जलं स्थापय। हे अग्ने! तव कृपया इमाः सर्वाः दिशः मत्कृते रसपूर्णाः भवेयुः॥

**मन्त्रः** – **ॐ वैश्वदेवी पुनती देव्यागाद्यस्यामिमाबह्व्यस्तन्वो व्वीतपृष्ठाः।**

**तयामदन्तःसधमादेषुव्वयछस्यामपतयोरयीणाम्॥ 08॥**

**भावार्थः** – हे वैश्वदेवि! त्वं पृथिव्यां रसान् स्थापय। ओषधिषु अन्तरिक्षे द्युलोके च जलं स्थापय। हे अग्ने ! तव कृपया इमाः सर्वाः दिशः मत्कृते रसपूर्णाः भवेयुः॥

**मन्त्रः** – **ॐ चित्पतिर्मा पुनातु वाक्पतिर्मा पुनातु देवो मा सविता**

**पुनात्वच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः।**

**तस्य ते पवित्रपते पवित्रपूतस्ययत्कामःपुनेतच्छकेयम् ॥09॥ (शु. यजु. 4.4)**

**भावार्थः** – हे ज्ञानाधिपते! त्वं पृथिव्यां रसान् स्थापय। ओषधिषु अन्तरिक्षे द्युलोके च जलं स्थापय। हे अग्ने! तव कृपया इमाः सर्वाः दिशः मत्कृते रसपूर्णाः भवेयुः॥

**शब्दार्थाः**

**पवमानः** विशुद्धिकर्ता, पावनकर्ता, **भूतये** कल्याणाय, **यविष्ठः** युवतमः, **सवितुः** सूर्यस्य, **दुरितानि** पापानि, **श्रुधी** श्रवणार्थे, **हव** (अत्र) आवाहनार्थे, **अवस्युः** रक्षयेयुः, **आचके** इच्छामि॥

## स्वाध्यायः

**1. कोष्ठकप्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा रिक्तस्थानानि पूरयत।**

(1) 'पवमानः' इति शब्दः .......... प्रयुक्तः। (पूरणार्थे/कल्याणार्थे/पवित्रतार्थे)

(2) 'श्रुधी' इति शब्दः .......... प्रयुक्तः। (श्रवणार्थे/सुधीत्यर्थे/ध्यानार्थे)

(3) 'अविधुरः' इति शब्दस्य .......... अर्थः भवति। (वधूः/विधुः/जीवितभार्यः)

(4) 'यविष्ठः' इति शब्दस्य .......... अर्थः भवति। (यवाः/युवकः/युवतमः)

(5) 'अवस्युः' इति शब्दस्य .......... अर्थः भवति। (निवासः/रक्षयेयुः/वासः)

(6) 'आचके' इति शब्दस्य ......... अर्थः भवति। (चकितः/आगच्छामि/इच्छामि)

(7) 'भूतये' इति शब्दस्य .......... अर्थः भवति। (भूतप्रेताय/पिशाचाय/कल्याणाय)

**2. निम्नलिखित प्रश्नानां एकवाक्येन उत्तरं लिखत।**

(1) माङ्गलिकपूजादिषु किं विशेषतः कर्तव्यम्?

(2) अभिषेकप्रयोगः कति विप्रैः क्रियते?

(3) अभिषेकर्तारो विप्राः कीदृशाः स्युः?

(4) अग्निः पृथिव्यां किं स्थापयेत्?

(5) के मां पवित्रं कुर्वन्तु?

(6) केभ्यः अहम् इमां कल्याणीं वाचम् उच्चारयामि?

(7) रक्षाकामनया यजमानः कम् इच्छति?

**3. निम्नलिखित प्रश्नानां सविस्तरम् उत्तरं लिखत।**

(1) '**यज्ञयागाधिकारार्थं सिद्ध्यर्थं...०॥**' इति तिसृणां कारिकाणां 'अभिषकप्रयोगस्य' महत्त्वस्य सन्दर्भे टिप्पणीं कुरुत।

(2) '**ॐ अनाधृष्टा पुरस्तादग्नेरा...०॥**' इति मन्त्रस्य 'पृथिवीप्रार्थनायाः' सन्दर्भे टिप्पणीं कुरुत।

(3) '**ॐ देवस्य त्वा सवितुः...० यशसेऽभिषिञ्चामि॥**' इति मन्त्रस्य 'सवितृप्रार्थनायाः' सन्दर्भे टिप्पणीं कुरुत।

**4. निम्नलिखितमन्त्राणां पूर्तिं कृत्वा भावार्थं लिखत।**

(1) ॐ पुनन्तु मा पितरः सोम्यासः ............ ०।

(2) ॐ अग्नऽ आयूꣳषि ............ ०।

(3) ॐ पवित्रेण पुनीहि मा ............ ०।

(4) ॐ वैश्वदेवी पुनती ............ ०।

(5) ॐ चित्पतिर्मा पुनातु ............ ०।

**छात्रप्रवृत्तिः**

पवमानसूक्तस्य मन्त्रान् कण्ठस्थीकुर्वन्तु। तत्र सपत्नीकयजमानस्य अभिषेके सूक्तस्यास्य प्रयोगं कुर्वन्तु।

**अध्यापक प्रवृत्तिः**

शिक्षकेन छात्रेभ्यः पनमानसूक्तस्य याज्ञिककर्मसु पूजासु च महत्त्वं ज्ञापयित्वा तस्य प्रायोगिकं ज्ञानं देयम्।

● ● ●